This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय ग्रंथालय

हस्तलिखित संग्रह

दाखल क्र. M 2018 विषय धर्मशास्त्र

नांव आपस्तंबोक्त श्राद्धसंकल्प प्रयोग (मुद्रित)

लेखक / लिपीकार —

पृष्ठ 12 काळ — पूर्ण / ~~अपूर्ण~~

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।अथापस्तंबोक्तश्राद्धसंकल्पप्रारंभः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथापस्तंबश्राद्धसंकल्पप्रयोगः ॥

॥ श्रीगणेशायनमः ॥ आचम्यप्राणानायम्य० ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतोमहापुरुषस्यवि०एवंगुणविशेषण०पुण्यतिथौ ॥
अस्मतपितुःप्रतिसांवत्सरिकश्राद्धांगत्वेनअग्नौकरणार्थंअग्निसिद्धिंकरिष्ये ॥ यत्राग्निस्थाप्यतेतत्रप्रादेशमात्रंश्वेततंडुलचूर्णेनचतुरस्रंस्थंडिलंकल्प
यित्वा ॥ (तत्रयज्ञियकाष्ठेन)प्राचीरुदक्संस्थाः ॥ उदीचीःप्राक्संस्थाः ॥ तिस्रःतिस्रोरेखालिखित्वा ॥ अद्भिरवोक्ष्य ॥ भूर्भुवः
सुवरोमित्यग्निंप्रतिष्ठाप्य ॥ शेषमुत्सिच्य ॥ उत्तरेणपूर्वेणवान्यत्तोयमुपदध्यात् ॥ एतद्धार्येणविद्यते ॥ अग्निमिध्वा ॥ ॐउपावरोह
जातवेदःपुनस्त्वंदेवेभ्योहव्यंवहनःप्रजानन् ॥ आयुःप्रजांरयिमस्मासुधेह्यजस्रोदीदिहिनोदुरोणेस्वाहा ॥ अग्नयइदं० ॥
ॐभूर्भुवःसुवः । तत्सवितुर्वरेण्यं ॥ भर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ईशानीमारभ्यप्रदक्षिणंपरिषिच्य ॥ अष्टदिक्षुअलंकृत्य ॥
अग्नयेनमः ॥ हुतवहायनमः ॥ हुताशिनेनमः ॥ कृष्णवर्त्मनेनमः ॥ देवमुखायनमः ॥ सप्तजिव्हायनमः ॥ वैश्वानरायनमः ॥
जातवेदसेनमः ॥ अदितेनुमन्यस्व–(दक्षिणतःप्राचीपर्यंत) ॥ अनुमतेनुमन्यस्व–(पश्चादुदीचीपर्यं०) ॥ सरस्वतेनुमन्यस्व–उत्तरतःप्राचीप०)
देवसवितःप्रसुव–(इशानीमारभ्यप्रदक्षिणंपरिषिच्य) ॥ चतुर्दिक्षुपरिस्तीर्य ॥ ॐचत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥
त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवेश ॥ सप्तहस्तःश्चतुश्शृंगसप्तजिव्होद्विशीर्षकः ॥ त्रिपात्प्रसन्नवदनसुखासीनशुचिस्मितः ॥
स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा ॥ बिभ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्रुचंस्रुवं ॥ तोमरंव्यजनंवामैर्घृतपात्रंचधारयन् ॥ आत्माभिमुखमासी
नएवंरूपोहुताशनः ॥ अग्नेवैश्वानरशांडिल्यगोत्रमेषध्वजप्राङ्मुखममसंमुखोवरदोभव ॥ (अग्निविच्छेदजनितप्रत्यवायपरिहारार्थं)औपा

सनांतरितप्रायाश्चितार्थंचअयाश्चमनोज्योतिरितिभूर्भुवःसुवरोमित्येतैर्मंत्रैराज्याहुतीर्होष्ये ॥ (स्रुवेणचतुर्गृहीतमाज्यं) ॐअयाश्चाग्नेस्यनभिश
स्तीश्चसत्यमित्वमयाअसि ॥ अयंसामनसाधृतोयसाहव्यमूहिषेयानोधेहिभेषजंस्वाहा ॥ अयसेग्नयइदं० ॥ ॐमनोज्योतिर्जुषतामाज्यं
विछिन्नंयज्ञंसमिमंदधातु ॥ याइष्टाउषसोनिम्रुचश्चताःसंदधामिहविषाघृतेनस्वाहा ॥ उषसोनिम्रुग्भ्यइदं ॥ ॐभूर्भुवःसुवःस्वाहा ॥ प्रजाप
प्रजापतयइदं० ॥ श्रीपरमेश्वरप्रीत्यर्थंसायंप्रातरौपासनहोमंतंडुलैर्होष्ये ॥ तंडुलानादाय ॥ ॐअग्नयेस्वाहा ॥ अग्नयइदं० ॥ ॐअग्नये
स्विष्टकृतेस्वाहा ॥ अग्नयेस्विष्टकृतइदं० ॥ ॐसूर्यायस्वाहा ॥ सूर्यायेदं० ॥ ॐअग्नयेस्विष्टकृतेस्वाहा ॥ अग्नयेस्विष्टकृतइदं० ॥
आहुतिसंसर्गप्रायश्चित्तार्थंसमिद्धोमंकरिष्ये ॥ ॐयत्रवेत्थवनस्पतेदेवानांगुह्यनामानि ॥ तत्रहव्यानिगामयस्वाहा ॥ वनस्पतयइदं० ॥
ॐभूर्भुवःसुवःस्वाहा ॥ प्रजापतयइदं० ॥ अदितेन्वमंस्थाः । अनुमतेन्वमंस्थाः । सरस्वतेन्वमंस्थाः । देवसवितःप्रासावीः ॥ ॐअग्ने
त्वन्नोअंतमउतत्राताशिवोभवावरूथ्यः ॥ तंत्वाशोचिष्ठदीदिवःसुम्नायनूनमीमहेसखिभ्यः ॥ वसुरग्निर्वसुश्रवाअच्छानक्षिद्युमत्तमंरयिंदाः ॥
सनोबोधिश्रुधीहवमुरुष्याणोअघायतःसमस्मात् ॥ स्वस्तिश्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं ॥ आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहनोग्न
मः ॥ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः ॥ सायंप्रातरौपासनहोमसाद्गुण्यार्थंअनाज्ञातत्रयं
दशगायत्रीजपमहंकरिष्ये ॥ ॐअनाज्ञातंयदाज्ञातंयज्ञस्यक्रियतेमिथु ॥ अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथं ॥ पुरुषसंमितो
यज्ञोयज्ञःपुरुषसंमितः ॥ अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथं ॥ यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वतेमर्तासः ॥ अग्निष्टद्धोताक्रतुविद्वि
जानन्यजिष्ठोदेवांऋतुशोयजाति ॥ दशगायत्रींजपेत् ॥ अनेनसायंपातरौपासनहोमाख्येनकर्मणाभगवान्परमेश्वरःप्रीयतांनमम ॥ वैश्वदेवंकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यात् ॥ अद्यपूर्वोच्चारितएवंगुण०पुण्यतिथौअन्नसंस्कारार्थंआत्मसंस्कारार्थंपंचसूनादोषपरिहारार्थंषडाहुतिवैश्वदेवेनयक्ष्ये ॥ ॐभूर्भुवःसुवःपूर्व वत्परिषिच्य ॥ अग्नयेनमःइत्यलंकृत्य ॥ अदितेनुमन्यस्वेतिपुनःपरिषिच्य ॥ चत्वारिशृंगेतिध्यात्वावरदोभव ॥ गृहसिध्मन्नमादाय ॥ अग्नावधिश्रित्य ॥ उदगुद्वास्य ॥ गायत्र्याप्रोक्ष्य ॥ अभिघार्य ॥ ॐअग्नयेस्वाहा ॥ अग्नयइदं ॥ ॐसोमायस्वाहा ॥ सोमायेदं० । ॐविश्वेभ्योदेवेभ्यःस्वाहा ॥ विश्वेभ्योदेवेभ्यइदं० ॥ ॐध्रुवायभूमायस्वाहा ॥ ध्रुवायभूमायेदं० ॥ ॐध्रुवक्षितयेस्वाहा ॥ ध्रुवक्षितयइदं० ॥ ॐअच्युतक्षितयेस्वाहा ॥ अच्युतक्षितयइ० ॥ ॐअग्नयेस्विष्टकृतेस्वाहा ॥ अग्नयेस्विष्टकृतइदं० ॥ परिषिच्य ॥ वैश्वदेवसाद्गुण्यार्थंव्याहृतिहोमंकरिष्ये ॥ ॐभूस्वाहा ॥ अग्नयइदं० ॥ ॐभुवःस्वाहा ॥ वायवइदं० ॥ ॐसुवःस्वाहा । सूर्यायेदं ॐभूर्भुवःसुवःस्वाहा ॥ प्रजापतयइदं० ॥ ॐअदितेन्वंमꣳस्थाः ॥ अनुमतेन्वंमꣳस्थाः ॥ सरस्वतेन्वंमꣳस्थाः ॥ देवसवितःप्रासावीः ॥ ॐअग्नेत्वन्नोअंतम०समस्मात् ॥ स्वास्तिश्रद्धांमेधां०श्रुतिः ॥ अनेनषडाहुतिवैश्वदेवाख्येनकर्मणाभगवानपरमेश्वरःप्रीयतांनमम ॥ इतिसपत्नीकपुरुषस्यअग्नौकरणार्थअग्निसिद्धिवैश्वदेवप्रयोगः ॥ अथब्रह्मचारीविधुरस्नातकश्चाग्निसिद्धिप्र० ॥ आचम्यप्राणाना० । श्रीपरमेश्वरप्रीत्यर्थंप्रतिसांवत्सरिकश्राद्धांगअग्नौकरणार्थंअग्निसिद्धिंक० । यत्राग्निस्थाप्यते०प्राचीरुदक्सꣳस्थाःइतिपूर्ववत् । भूर्भुवःसुवरोमित्याग्निंप्रतिष्ठाप्य०अग्निमिध्वा । ॐभूर्भुवःसुवःइत्यग्निंपूर्ववत्परिषिच्य । अग्नयेनमःइत्याद्यलंकृत्य । अदितेनुमन्यस्वेतिपरिषिच्य । परिस्तीर्य । चत्वारिशृंगेतिध्यात्वा ॥ अयाश्चेतिमंत्रेणैकाज्याहुतिंहुत्वा ॥ ॐअयाश्चा० ॥ अदितेन्वमꣳस्थाःपरिषिच्य । ॐअग्नेत्वंन्नो०स्मात् । अनेनअग्नौकरणार्थंअग्निसिद्धेनभगवान्परमे

श्वरःप्रीयतांनमम ॥ षडाहुतिवैश्वदेवंकुर्यात् ॥ * एवंविधुरदूरभार्याप्रवासीस्नातकब्रह्मचारीणइति ॥ ॥ ॥

आचम्य । पवित्रपाणिःप्राणानायम्य । पवित्रंवंतःपरिवाचंमासतेपितैषांप्रत्नोअभिरक्षातिव्रतं । महःसमुद्रंवरुणःस्तिरोदधेधीराइच्छेकुर्धरुणेष्वारभं । ॥ पवित्रेधृत्वा । तिथिर्विष्णुस्तथावारोनक्षत्रंविष्णुरेवच ॥ योगश्चकरणंचैवसर्वंविष्णुमयंजगत् ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतोम०पुण्यतिथौपुरुरवार्द्रवसंज्ञकानांविश्वेषांदेवानां ॥ प्राचीनावीती ॥ अस्मत्पितृपितामहप्रपितामहानां–(अमुकगोत्राणांअमुकशर्मणांवसुरुद्रादित्यस्वरूपाणां) । प्रतिसांवत्सरिकश्राद्धादौदेहेंद्रियआत्मद्रव्यस्थलगृहभांडभाजनशुध्यर्थंप्रायश्चित्तसूक्तजाप्यमंत्रपठनमहंकरिष्ये । कुरुष्व । सव्यं ॥ यवोदकतिलोदकंचकरिष्ये ॥ इमंमेगंगेयमुने०मया–(ताम्रपात्रेउदकंनिक्षिप्य) ॥ गंधद्वारादुरा०श्रियं–(इतिगंध) ॥ यवोसिधान्यंराजोवावारुणोमधुसंयुतः । निर्णोदःसर्वपापनांपवित्रंमृषिभिःस्मृतं–(इतियवान्) ॥ तिलोसिसोमदेवत्योगोसवोदेवनिर्मितः । प्रत्नवद्भिःप्रत्नस्वधएहि । तिलान् । कांडात्कांडात्प्ररोहंतीपरुषःपरुषःपरि ॥ एवानोदूर्वेप्रतंनुसहस्रेणशतेनच–(इतिकूर्चंनिक्षिप्य) ॥ याःफलिनीयाअफलाअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचंत्वꣳहसः–(पूगीफलं) ॥ अग्नेरेतःश्चंद्रꣳहिरण्यमद्भ्यःसंभूतममृतंप्रजासु ॥ तत्संभरन्नुत्तरतोनिधायातिप्रयच्छंदुरितिंतरेयं ॥

टीपः–बृहन्नारदीये—स्नातकाविधुरावास्युर्यदिवाब्रह्मचारिणः ॥ अग्नौकरणहोमंतुकुर्युस्तेलौकिकेनलः ॥ तैत्तिरीयैर्ब्रह्मचारिस्नातकविधुरलौकिकाग्नावेवअयाश्चमंत्रेणेतिसिद्धिकृत्वाहोमः । कार्यःसंस्कारररत्नमाला । १ कूर्चप्रमाणः—दर्शेपंचाद्विकेसतमहालयनवस्तथा ॥ कूर्चंतुत्रिविधंज्ञेयंशेषंषट्पौरुषं विदुः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बृहस्पतेजुषस्वनोहव्यानिविश्वदेव्य । रास्वरत्नानिदाशुषे-(इतिहिरण्यं) । यवतिलपात्रयोः अयंगंधःइमानिपुष्पाणितुलसीदलसहितानिदर्भपत्राणि । कूष्मांडैर्जुहुयाद्योपूतइवमन्येतयथास्तेनोयथाभ्रूणहैवमेषभवतियोयोनौरेतःसिंचतियदर्वाचीनमेनोभ्रूणहत्यायास्तस्मान्मुच्यतेयावदेनोदीक्षामुपैति दीक्षितएतैःसंततिर्जुहोतिसंवत्सरेदीक्षितोभवतिसंवत्सरादेवात्मानंपुनीतेमासंदीक्षितोभवतियोमासःससंवत्सरःसंवत्सरादेवात्मानंपुनीतेचतुर्विंश तिंरात्रीर्दीक्षितोभवतिचतुर्विंशतिरर्धमासाःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेद्वादशरात्रीर्दीक्षितोभवतिद्वादशमासाःसंवत्सरःसंवत्सरादेवात्मानं पुनीतेषड्रात्रीर्दीक्षितोभवतिषड्वाऋतवःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेतिस्रोरात्रीर्दीक्षितोभवतित्रिपदागायत्रीगायत्रियाएवात्मानंपुनीतेनमांसं समंश्नीयान्नस्त्रियमुपेयान्नोपर्यासीतजुगुप्सेतानृतात्पयोब्राह्मणस्यव्रतंयवागूराजन्यस्यामिक्षावैश्यस्याथसौम्येप्यध्वरएतद्व्रतंब्रूयाद्यदिमन्येतोपदस्या मीत्योदनंधानाःसक्तून्घृतमित्यनुव्रतयेदात्मनोनुपदासाय ॥ तिलोदकयवोदकेमार्जनंकुर्यात् ॥ शुचीवोहव्यामरुतःशुचीनांशुचिंहिनोम्य ध्वरंशुचिभ्यः ॥ ऋतेनसत्यमृतसापआयन्छुचिजन्मानःशुचयःपावकाः ॥ अग्निःशुचिव्रततमःशुचिर्विप्रःशुचिःकविः ॥ शुचीरोचतआहु तः ॥ उदग्नेशुचयस्तवशुक्राभ्राजन्तईरते ॥ तवज्योतींष्यर्चयः ॥ ब्राह्मणेष्वमृतंहितं ॥ येनदेवाःपवित्रेण ॥ आत्मानंपुनतेसदा ॥ तेनसहस्रधारेण ॥ पावमान्यःपुनंतुमा ॥ प्राजापत्यंपवित्रं ॥ शतोद्यामंहिरण्मयं ॥ तेनब्रह्मविदोवयं ॥ पूतंब्रह्मपुनीमहे ॥ इंद्रः सुनीतीसहमांपुनातु ॥ सोमःस्वस्त्यावरुणःसमीच्या ॥ यमोराजाप्रमृणाभिःपुनातुमा ॥ जातवेदामोर्जयंत्यापुनातु ॥ अपवित्रःपवित्रो वासर्वावस्थांगतोपिवा ॥ यस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः ॥ सर्वाणिस्थलानिशुचयोभवंतु-(संतुशुचीनि०) ॥ तिलदर्भहिरण्यं गृहीत्वा-(विप्रान्त्रिःप्रदक्षिणीकृत्य) ॥ समस्तसंपत्समवाप्तिहेतवःसमुत्थितापत्कुलधूमकेतवः ॥ अपारसंसारसमुद्रसेतवःपुनंतुमांब्राह्मण

पादपांसवः ॥ आपद्घनध्वांतसहस्रभानवःसमीहितार्थार्पणकामधेनवः ॥ समस्ततीर्थांबुपवित्रमूर्तयोरक्षंतुमांब्राह्मणपादपांसवः ॥ विप्रौघः दर्शनात्क्षिप्रंक्षीयंतेपापराशयः ॥ वंदनान्मंगलावाप्तिरर्चनादच्युतंपदं ॥ आधिव्याधिहरंनृणांमृत्युदारिद्र्यनाशनं ॥ श्रीपुष्टिकीर्तिदंवंदे विप्रश्रीपादपंकजं ॥ यावंतीर्वैदेवतास्ताःसर्वावेदविदिब्राह्मणेवसंतितस्माद्ब्राह्मणेभ्योवेदविद्भ्योदिवेदिवेनमस्कुर्यान्नाश्लीलंकीर्तयेदेताए वेदवतां प्रीणाति ॥ द्वौनमस्कारौकृत्वा ॥ नमोदेवेभ्यः ॥ अपसव्यं ॥ स्वधापितृभ्यः ॥ पितृपितामहप्रपितामहानांअमुकगोत्राणांअ० श० ॥ पितुःप्रतिसांवत्सरिकश्राद्धंकर्तुंममाधिकारसंपदस्त्वितिभवंतोब्रुवंतु—(अस्तुश्राद्धादिकारसंपत्) ॥ कालस्यमुख्यकालो स्त्वितिभवंतोब्रुवंतु—(कालस्यमुख्यकालोस्तु०) ॥ ॥ ॥ पाकदीनांपवित्रतास्त्वितिभवंतोब्रुवंतु—(पाकादीनांपवित्रतास्तु०) सर्वेपाकाःशुचयोभवंतु ॥ सव्यं । प्राणानायम्य ॥ पुरुरवार्द्रवसंज्ञकानांविश्वेषांदेवानां ॥ अपसव्यं ॥ पितुःप्रतिसांवत्सरिकश्राद्धेपितृपिता महप्रपितामहानां ॥ गो० श० वसुरुद्रा० ॥ प्रतिसांवत्सरिकश्राद्धंसदैवंसपिंडंसा[illegible]रणंपार्वणेनविधिनायुष्मदनुज्ञयासद्यःकरिष्ये-(कुरुष्व) । सव्यंब्राह्मणवरणंक० । कुरु० । पुरुरवार्द्रवसंज्ञकानांविश्वेषांदेवानांस्थानेत्वयाक्षणःकरणीयः । (सुकरणीयः) । एवंद्वितीयदेवार्थेक्षणःकरणीयः । (सुकर०) ॥ अपसव्यं ॥ अस्मत्पितृपितामहप्रपितामहानां ॥ गो०श०वसुरु०स्थानेत्वयाक्षणःकरणीयः-(सुकरणीयः) । (पित्रर्थेत्वया क्षणःकरणीयःपितामहस्यत्वया०प्रपितामहस्य०) ॥ सव्यं ॥ अक्रोधनैःशौचपरैःसततंसत्यवादिभिःभवितव्यंभवद्भिश्चमयाचअस्मत्पि तुःप्रतिसांवत्सरिकश्राद्धकारणात् ॥ (श्राद्धकर्माणि) ॥ * देवपाद्यस्थानेचतुरस्रमंडलंकृत्वा ॥ अयंगंधः । यवाक्षतकुशाः ॥ पुरुरवार्द्रवसज्ञं

टीपः–१ प्रादेशमात्रंदेवानांउत्तरेचतुरस्रकं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कश्च विश्वेदेवाःआगतसुस्वागतं ॥ पुरु० देवाःइदंवःपाद्यंब्रह्मणेभूर्भुवःसुवःइदंवःपाद्यं(सुपाद्यं) ॥ शंन्नोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्त्रवंतुनः ॥ शुक्रमसिज्योतिरसितेजोसिदेवोवःसवितोत्पुनात्वच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिः ॥ चरणंपवित्रंविततंपुराणंयेन पूतस्तरतिदुष्कृतानि ॥ तेनपवित्रेणशुद्धेनपूताअतिपाप्मानमरातिंतरेम ॥ नमोब्रह्मण्यदेवायगोब्राह्मणहितायच ॥ जगद्धितायकृष्णाय गोविंदायनमोनमः ॥ वंदनान्मंगलावाप्तिः ॥ अपसव्यं ॥ पितृपाद्यस्थानेवर्तुलमंडलंकृत्वा ॥ अयंगंधःअयंतिलकुशाःअस्मत्पितृपि०महाः ॥ आगतं–(सुस्वागतं) ॥ गोत्राःपितृपितामहप्रपितामहाः । भूर्भुवःस्वधाइदंवःपाद्यं ॥ सव्येनसुपाद्यं ॥ शंन्नोदेवी० ॥ अप० ॥ शुक्रमसि ज्यो० ॥ सव्यं ॥ चरणंपवि० ॥ वंदनान्मंगलावाप्तिः ॥ हस्तौपादौप्रक्षाल्य ब्राम्हणैसहआचम्य ॥ पुरुरवार्द्रवसंज्ञकाविश्वेदेवा भूर्भुवःसुवःस्तांअयंवोविष्टरः ॥ अत्रोपविशंतुभवंतः–(अत्रोपविशामः) ॥ अपस० ॥ अस्मत्पितृपितामहप्रपितामहाःभूर्भुवःस्वधास्तांअ यंतेविष्टरः ॥ अत्रोपविशंतुभवंतः–(अत्रोपविशामः) ॥ विष्टरांतेपवित्रत्यागः ॥ आचम्य ॥ पवित्रेकृत्वा ॥ पवित्रोंवन्तःप० ॥ अद्यपूर्वोच्च०तिथौ ॥ प्राचीनावीतीअस्मत्पितुःप्रतिसांवत्सरिकअपक्रांतश्राद्धकर्मकरिष्ये–कु० ॥ चतुर्दिक्षुपरोदकंप्रोक्ष्य ॥ अपहताअसु रारक्षांसिपिशाचायेक्षयंतिपृथिवीमनु ॥ अन्यत्रैतोगछंतियत्रैतेषांगतंमनः ॥ अप० । दक्षिणतः । चतुर्दिक्षुतिलान्विकीर्य ॥ वातिलोदकंप्रोक्ष्य । उदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः ॥ असुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु ॥ सव्यं ॥ गायत्रीमंत्रेणपाकप्रोक्षणं ॥

टीपः—१ वितस्तिमात्रंपितृणांदक्षिणेवर्तुलंभवेत् ॥ २ बहिरंगणेअवटंकृत्वातत्रब्राह्मणानांपादप्रक्षालनं —विश्वप्रकाशः

यद्देवादेवहेळनंदेवासश्चकृमावयं ॥ आदित्यास्तस्मान्मामुंचतर्तस्यर्तेनमामित ॥ देवाजीवनकाम्यायद्वाचानृतमूदिम ॥ तस्मान्नइह मुंचताविश्वेदेवाःसजोषसः ॥ ऋतेनद्यावापृथिवीऋतेनत्वंसरस्वति ॥ कृतान्नःपाह्येनसोयत्किंचानृतमूदिम ॥ पाकादिनांपवित्रतास्तु ॥ सर्वपाकाःशुचयोभवंतु ॥ श्राद्धार्थाःसंपादितपदार्थाःदेशतःकालतश्चश्राद्धेहवियोग्याभवंतु ॥ अप०श्राद्धकालेगयांध्यात्वाध्यात्वादेवंगदाधरं ॥ वस्वादींश्चपितॄन्ध्यात्वाततःश्राद्धंप्रवर्ततेप्रवर्तय ॥ सव्यं ॥ देवताभ्यः ॥ अप० ॥ पितृभ्यश्चनमःस्वाहायैस्वधायैनित्यमेवनमोनमोनित्यमे वनमोनमः ॥ सव्यं ॥ पुरुरवा०ब्रह्मणेभूर्भुवःसुवः–इदमासनं ॥ स्वासनं ॥ आस्यतांधर्मोसिआपः ॥ दैवेक्षणःक्रियतां ॥ ॐतथा ॥ प्राप्नो तुभवान्प्राप्नवानि ॥ भूमिंप्रोक्ष्य ॥ दर्भावास्तीर्य ॥ पात्रद्वयंन्युब्जंनिधाय ॥ प्रोक्ष्य ॥ उत्तानेप्रोक्ष्य ॥ यवान्विकीर्यदर्भांतर्हितेष्व पआसिच्य ॥ तूष्णींउदकमापूर्य ॥ शन्नोदेवीत्यभिमंत्र्य ॥ शंन्नोदेवी० ॥ यवोसिधान्य० ॥ अर्घ्यपात्रयोःअयंगंधः । इमानिवःपुष्पाणि तुलसीदलानि ॥ विश्वेभ्योदेवेभ्योवोजुष्टंगृण्हामि २ इतिमंत्रेणार्घ्यपात्रयोःकुशान्निधायित्वानिरस्य ॥ देवपात्रेसंपन्नेसुसंपन्नेस्वाहार्घ्यःसं स्वर्घ्यो ॥ पुरूरवार्द्रवसंज्ञकाविश्वान्देवान्भवत्स्वावाहयिष्ये–(आवाहय) ॥ विश्वेदेवासआगतशृणुतामइमंहवं ॥ एदंबर्हिर्निषीद त ॥ विश्वेदेवाःशृणुतेमंहवंमेयेअंतरिक्षेयउपद्यविष्ठ ॥ येअग्निजिव्हाउतवायजत्राआसद्यास्मिन्बर्हिषिमादयध्वं ॥ आगछंतुमहाभागाविश्वेदेवामहाबलाः ॥ येअत्रविहिताश्राद्धेसावधानाभवंतुते–(सावधानोऽस्तु) ॥ यादिव्याआपःपयसासंबभूवुर्याअंतरिक्षउतपार्थिवीर्याः । हिरण्यवर्णायज्ञियास्तानआपःशंस्योनासुहवाभवंतु ॥ पुरूरवार्द्रवसंज्ञकाविश्वेदेवाःइदंवोअर्घ्यं–(अस्त्वर्घ्यं) ॥ पात्रेस्थानेस्था ॥ ततःशुद्धोदकं । अर्चंतप्रार्चंतप्रियमेधासोअर्चता ॥ अर्चंतुपुत्रकाउतपुरंनधृष्ण्वर्चत ॥ पुरूरवा०यथाभागशःअमीवोगंधाः–(सुगंधाः) ॥ स्वाहानमोनमम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आयंनेतेपरायणेदूर्वारोहंतुपुष्पिणीः । ह्रदाश्चपुंडरीकाणिसमुद्रस्यगृहाइमे । माल्यार्थेइमानिवःपुष्पाणि–सुपुष्पाणि । स्वाहानमोनमम ॥ धूरसि
धूर्वधूर्वंतंधूर्वतंयोस्मान्धूर्वतितंधूर्वयंवयंधूर्वामः ॥ उदकेनैवसांकल्पितंवोधूपः–(सुधूपः) ॥ उद्दीप्यस्वजातवेदोपघ्नंनिर्ऋतिंमम ॥ पशूंश्चमह्यमावह
जीवनंचदिशोदिश ॥ ज्वालाभिधेगृहस्थितंवोज्योतिः–(सुज्योति) ॥ अनुलेपनार्थेगोपीचंदनं–(सुचंदनं) ॥ धारणार्थेयज्ञोपवीतं–(सूप
वीतं) ॥ फलार्थेपूगफलं–(सुफलं) ॥ आच्छादनार्थेकिंचिद्धिरण्यं ॥ पवित्रार्थेइमौकुशौ–(अस्तुपवित्रं) ॥ युवांसुवासाःपरिवीतआ
गात्सउश्रेयान्भवतिजायमानः ॥ तंधीरासःकवयउन्नयंतिस्वाधियोमनसादेवयंतः ॥ देवेभ्यःएतानिगंधपुष्पधूपदीपआच्छादनांताःपंचोपचाराः
सर्वेसंपूर्णाभवंतु ॥ अर्चनविधौष्वर्चितमस्तु ॥ युष्मदनुज्ञेयादेवाद्यर्चनंसंपूर्णं ॥ अपसव्यं ॥ पित्राद्यर्चनंकरिष्ये–(कुरुष्व) ॥ पितृपि
तामहप्रपितामहानांगोत्रा०श०वसुरुद्रादित्यस्वरूपाणां ॥ ब्रह्मणेभूर्भुवःस्वधा इदमासनं–(स्वासनं) ॥ आस्यतांधर्मोसिअपः ॥ प्रतिसां
वत्सरिकश्राद्धेपित्र्येक्षणःक्रीयतां ॥ ओंतथा ॥ प्राप्नोतुभवान्–प्राप्नवानि ॥ भूमिंप्रोक्ष्य ॥ दक्षिणाग्रांदर्भानास्तीर्य ॥ तत्र
पात्रत्रयंन्युब्जंनिधाय ॥ गायत्र्याप्रोक्ष्य ॥ उधृत्य ॥ उत्तानेप्रोक्ष्य ॥ दक्षिणाग्रान्दर्भान्निधाय ॥ उदकंपूरयित्वा ॥ शंनोदेवी
त्यभिमंत्र्य ॥ शन्नोदेवी० ॥ तिलोसिसोम०एहि । अस्मत्पितरंअमुकगोत्रंअ०शर्माणंवसुरूपंइमान्लोकान्प्रीणयाहिनस्वधानमः । एवं ।
पितामहं० ॥ प्रपितामहं०–(प्रतिमंत्रंप्रतिपात्रेतिलान्निक्षिप्य) ॥ अर्घ्यपात्रेषुअयंगंधःइमानिपुष्पाणितुलसीदलानी ॥ सर्वेउपचाराःतिलैः
संपूर्णाःसंतु ॥ पितृपात्रेतेवोजुष्टंगृण्हामिपितामहपात्रे०प्रपितामहपात्रेतेवो०अर्घ्यपात्रेषुदर्भश्रामइत्वा ॥ अर्घ्यपात्राणिसंपन्नानिसुसंपन्ना
नि ॥ स्वधार्घ्याःसंत्वर्घ्यः ॥ अस्मत्पितृपितामहप्रपितामहान्अमुकगोत्रान्अमुकशर्मणःवसु०पान् ॥ भवत्सुआवाहयिष्ये–आवाहया ॥

उशंतस्त्वाहवामहउशंतःसमिधीमहि ॥ उशन्नुशतआवहपितॄन्हविषेअत्तवे ॥ आयंतुनःपितरःसोम्यासोग्निष्वात्ताःपथिभिर्देवयानैः ॥ अस्मि
न्यज्ञेस्वधयामदंत्वधिब्रुवंतुतेअवंत्वस्मान्–(हस्तेतिलान्गृहीत्वाप्रतिविप्रमावाह्य) ॥ सावधानाभवंतुते–(सावधानोस्तु) ॥ यादिव्याआपःपय
सा०भवंतु ॥ अस्मत्पितःगोत्रशर्मन्वसुरूपइदंतेर्घ्यं–(अस्त्वर्घ्यं) ॥ एवंपितामह०गो०श०रु०इदंतेर्घ्यंप्रपितामहः०गो०श०आ०इदंतेर्घ्यं–ततः
शुद्धोदकं ॥ अर्चेतप्रार्चत० ॥ गंधद्वारां० ॥ पितृपितामहप्रपितामहाःयथाभागशःअर्मातेगंधाः–(सुगंधाः)आयंनेते० ॥ माल्यार्थेइमानि
वपुष्पाणि–(सुपुष्पाणि) ॥ धूरसिधूर्व०धूपः–(सुधूपः) ॥ उद्दीप्यस्वजात० ॥ सूर्यस्थितंवोज्योतिः–(सुज्योतिः) ॥ अनुलेप
नार्थेगोपीचंदनं–(सुचंदनं) ॥ धारणार्थेयज्ञोपवीतं–(सूपवीतं) ॥ फलार्थेपूगफलं–(सुफलं) ॥ आच्छादनार्थेकिंचिद्धिरण्यं ॥ पवित्रा
र्थेइमेकुशाः–(अस्तुपवित्रं) ॥ इदंपितृभ्योनमोअस्त्वद्ययेपूर्वासोयउपरासईयुः ॥ येपार्थिवेरजस्यानिषत्तायेवानूनंसुवृजनासुविक्षु ॥ पितृ
पितामहप्रपितामहाःएतेअत्रगंधपुष्पधूपदीपआच्छादनांताःपंचोपचाराःसर्वेसंपूर्णाभवंतु ॥ अर्चनविधेष्वर्चितमस्तु । युष्मदनुज्ञेयापित्राद्यर्चनंसंपूर्णं ।
सव्यं ॥ विष्णोस्मरणपर्वकंमंडलादिपात्रासादनंकरिष्ये–(कुरुष्व) ॥ देवस्थानेचतुरस्रमंडलंकृत्वा ॥ अपसव्यं ॥ पितृपात्रस्थानेवर्तुलमंड
लंकृत्वा ॥ भोजनपात्राणिस्थापयेत् ॥ अद्य०पुण्यतिथौअस्मत्पितुःप्रतिसांवत्सरिकश्राद्धेभवदनुज्ञयाअग्नावग्नौकरणंकरिष्ये–(क्रीयतां) ॥ अ
ग्नौकरणार्थंपात्रस्थमन्नमादाय ॥ गायत्र्याप्रोक्ष्य ॥ अभिघार्य ॥ अन्नंचतुर्भागंकृत्वा ॥ ईशान्यभागेअभिघार्य ॥ तूष्णींअग्निंपरिषिच्य ॥
अग्नेश्चतुर्दिक्षुदर्भान्परिस्तीर्य ॥ उपवीती ॥ सोमायपितृपीतायस्वधानमःस्वाहा ॥ अप० ॥ सोमायपितृपीतायेदं० ॥ उप० ॥ अग्नयेक
व्यवाहनायस्वधानमःस्वाहाअप० ॥ अग्नयेकव्यवाहनायेदं० ॥ तूष्णींअप्रदक्षिणंपरिषिच्य ॥ पितृपात्रेअभिघार्य ॥ स्वधेयंअस्तुस्वधा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ अन्नंदद्यात्–(द्विवारं) ॥ आस्त्वधेत्याश्रावयति ॥ अस्तुस्वधेतिप्रत्याश्रावयति ॥ स्वधानमइतिवषट्करोतिस्वधाकारोहिपितृणां ॥ सव्यं ॥
मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतायजातमग्निं ॥ कविꣳसंम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः ॥ इतिमंत्रेणदेवपात्रेअभिघार्य ॥
आमासुपक्वमैरयआसूर्यꣳरोहयोदिवि ॥ घर्मंनसामंतपतासुवृक्तिभिर्जुष्टंगिर्वणसेगिरः ॥ सोमोधेनुꣳसोमोअर्वंतमाशुंसोमोवीरंकर्मण्यंददातु ॥
सादन्यंविदथ्यꣳसभेयंपितुःश्रवणंयोददाशदस्मै । पितृपात्रेअभिघार्य । देवपूर्वकमन्नं परिवेष्य । ... न्नशुध्यर्थंअन्नसूक्तंपठेत् । आब्रह्मंन्ब्राह्मणो
ब्रह्मवर्चसीजायतामास्मिन्राष्ट्रेराजन्यइषव्यःशूरोमहारथोजायतांदोग्ध्रीधेनुर्वोढानड्वा ... सप्तिः पुरंधिर्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमान
स्यवीरोजायतांनिकामेनिकामेनःपर्जन्योवर्षतुफलिन्योनओषधयःपच्यंतांयोगक्षेमोनः ... ताम् । आब्रह्मंन्ब्राह्मणोब्रह्मवर्चसीजायतामित्याह । ब्राह्म
णएवब्रह्मवर्चसंदधाति ॥ तस्मात्पुराब्राह्मणोब्रह्मवर्चस्यजायत ॥ आस्मिन्राष्ट्रे ... न्यइषव्यःशूरोमहारथोजायतामित्याह ॥ राजन्यएवशौर्यम
हिमानंदधाति ॥ तस्मात्पुराराजन्यइषव्यःशूरोमहारथोजायत ॥ दोग्ध्रीधेनुरित्याह ॥ धेन्वामेवपयोदधाति ॥ तस्मात्पुरादोग्ध्रीधेनुरजायत ॥
वोढानड्वानित्याह ॥ अनडुह्येववीर्यंदधाति ॥ तस्मात्पुरावोढानड्वानजायत ॥ आशुःसप्तिरित्याह ॥ अश्वएवजवंदधाति ॥ तस्मात्पुराशुर
श्वोजायत ॥ पुरंधिर्योषेत्याह ॥ योषित्येवरूपंदधाति ॥ तस्मात्स्त्रीयुवतिःप्रियाभावुका ॥ जिष्णूरथेष्ठाइत्याह ॥ आहवैतत्रजिष्णु
रथेष्ठाजायते ॥ यत्रैतेनयज्ञेनयजंते ॥ सभेयोयुवेत्याह ॥ योवैपूर्ववयसी ॥ ससभेयोयुवा ॥ तस्माद्युवापुमान्प्रियोभावुकः ॥ आस्य
यजमानस्यवीरोजायतामित्याह ॥ आहवैतत्रयजमानस्यवीरोजायते ॥ यत्रैतेनयज्ञे० ॥ निकामेनिकामेनःपर्जन्योवर्षत्वित्याह ॥ निकामेनिका
मेहवैतत्रपर्जन्योवर्षति ॥ यत्रैतेनयज्ञेन० ॥ फलिन्योनओषधयःपच्यंतामित्याह ॥ फलिन्योहवैतत्रौषधयःपच्यंते ॥ यत्रैतेनयज्ञेन० ॥

। अथापस्तंबोक्तश्राद्धसंकल्पप्रारंभः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथापस्तंबश्राद्धसंकल्पप्रयोगः ॥

॥ श्रीगणेशायनमः ॥ आचम्यप्राणानायम्य० ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतोमहापुरुषस्यवि० एवंगुणविशेषण० पुण्यतिथौ ॥
अस्मत्पितुःप्रतिसांवत्सरिकश्राद्धांगत्वेनअग्नौकरणार्थंअग्निसिद्धिंकरिष्ये ॥ यत्रा[illegible]स्थाप्यस्तत्रप्रादेशमात्रंश्वेततंडुलचूर्णेनचतुरस्रंस्थंडिलंकल्प
यित्वा ॥ (तत्रयज्ञियकाष्ठेन)प्राचीरुदक्सꣳस्थाः ॥ उदीचीःप्राक्सꣳस्थाः ॥ [illegible]ःतिस्रोरेखालिखित्वा ॥ अद्भिरवोक्ष्य ॥ भूर्भुवः
सुवरोमित्यग्निंप्रतिष्ठाप्य ॥ शेषमुत्सिच्य ॥ उत्तरेणपूर्वेणवान्यत्तोयमुपदध्य[illegible] ॥ एतद्धार्यैणविद्यते ॥ अग्निमिध्वा ॥ ॐउपावरोह
जातवेदःपुनस्त्वंदेवेभ्योहव्यंवहनःप्रजानन् ॥ आयुःप्रजाꣳरयिमस्मासुधेह्यजस्रोदीदिहिनोदुरोणेस्वाहां ॥ अग्नयइदं० ॥
ॐभूर्भुवःसुवः । तत्सवितुर्वरेण्यं ॥ भर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ईशानीमारभ्यप्रदक्षिणंपरिषिच्य ॥ अष्टदिक्षुअलंकृत्य ।
अग्नयेनमः ॥ हुतवहायनमः ॥ हुताशिनेनमः ॥ कृष्णवर्त्मनेनमः ॥ देवमुखायनमः ॥ सप्तजिव्हायनमः ॥ वैश्वानरायनमः ॥
जातवेदसेनमः ॥ अदितेनुमन्यस्व—(दक्षिणतःप्राचीपर्यंत) ॥ अनुमतेनुमन्यस्व—(पश्चादुदीचीपर्यं०) ॥ सरस्वतेनुमन्यस्व—उत्तरतःप्राचीप०)
देवसवितःप्रसुव—(इशानीमारभ्यप्रदक्षिणंपरिषिच्य) ॥ चतुर्दिक्षुपरिस्तीर्य ॥ ॐचत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥
त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याꣳआविवेश ॥ सप्तहस्तःश्चतुशृंगसप्तजिव्होद्विशीर्षकः ॥ त्रिपात्प्रसन्नवदनसुखासीनशुचिस्मितः ॥
स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा ॥ बिभ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्रुचंस्रुवं ॥ तोमरंव्यजनंवामैर्घृतपात्रंचधारयन् ॥ आत्माभिमुखमासी
नएवंरूपोहुताशनः ॥ अग्नेवैश्वानरशांडिल्यगोत्रमेषध्वजप्राङ्मुखममसंमुखोवरदोभव ॥ (अग्निविच्छेदजानितप्रत्यवायपरिहारार्थं)औपा

सनांतरितप्रायाश्चितार्थंचअयाश्चमनोज्योतिरितिभूर्भुवःसुवरोमित्येतैर्मंत्रैराज्याहुतीर्होष्ये ॥ (स्रुवेणचतुर्गृहीतमाज्यं) ॐअयाश्चाग्नेस्यनभिश
स्तीश्चसत्यमित्वमयाअसि ॥ अयंसामनसाधृतोयसाहव्यमूहिषेयानोधेहिभेषजꣳस्वाहां ॥ अयसेग्नयइदं० ॥ ॐमनोज्योतिर्जुषतामाज्यं
विच्छिन्नंयज्ञꣳसमिमंदधातु ॥ याइष्टाउषसोनिम्रुचश्चताःसंदधामिहविषाघृतेनस्वाहां ॥ उषसोनिम्रुग्भ्यइदं ॥ ॐभूर्भुवःसुवःस्वाहां ॥ प्रजाप
प्रजापतयइदं० ॥ श्रीपरमेश्वरप्रीत्यर्थंसायंप्रातरौपासनहोमंतंडुलैर्होष्ये ॥ तंडुलानादाय ॥ ॐअग्नयेस्वाहां ॥ अग्नयइदं० ॥ ॐअग्नये
स्विष्टकृतेस्वाहां ॥ अग्नयेस्विष्टकृतइदं० ॥ ॐसूर्यायस्वाहां ॥ सूर्यायेदं० ॥ ॐअग्नयेस्विष्टकृतेस्वाहां ॥ अग्नयेस्विष्टकृतइदं० ॥
आहुतिसंसर्गप्रायश्चित्तार्थंसमिद्धोमंकरिष्ये ॥ ॐयत्रवेत्थवनस्पतेदेवानांगुह्या[illegible]नि ॥ तत्रहव्यानिगामयस्वाहां ॥ वनस्पतयइदं० ॥
ॐभूर्भुवःसुवःस्वाहां ॥ प्रजापतयइदं० ॥ अदितेन्वमꣳस्थाः । अनुमतेन्वम[illegible] । सरस्वतेन्वमꣳस्थाः । देवसवितःप्रासावीः ॥ ॐअग्ने
त्वन्नोअंतमउतत्राताशिवोभववरूथ्यः ॥ तंत्वाशोचिष्ठदीदिवःसुम्नायनूनमीमहेस[illegible]भ्यः ॥ वसुरग्निर्वसुश्रवाअच्छानक्षिद्युमत्तमꣳरयिंदाः ॥
[illegible]शुधीहवमुरुष्याणोअघायतःसमस्मात् ॥ स्वस्तिश्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियं[illegible] ॥ आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहनोग्न
मः ॥ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः ॥ सायंप्रातरौपासनहोमसाद्गुण्यार्थंअनाज्ञातत्रयं
दशगायत्रीजपमहंकरिष्ये ॥ ॐअनाज्ञातंयदाज्ञातंयज्ञस्यक्रियतेमिथु ॥ अग्नेतदस्यकल्पयत्वꣳहिवेत्थयथातथं ॥ पुरुषसंमितो
यज्ञोयज्ञःपुरुषसंमितः ॥ अग्नेतदस्यकल्पयत्वꣳहिवेत्थयथातथं ॥ यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वतेमर्तासः ॥ अग्निष्टद्धोताक्रतुविद्वि
जानन्यजिष्ठोदेवाꣳऋतुशोयजाति ॥ दशगायत्रींजपेत् ॥ अनेनसायंप्रातरौपासनहोमाख्येनकर्मणाभगवान्परमेश्वरःप्रीयतांनमम ॥ वैश्वदेवंकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्यात् ॥ अद्यपूर्वोच्चारितएवंगुण०पुण्यतिथौअन्नसंस्कारार्थआत्मसंस्कारार्थपंचसूनादोषपरिहारार्थषडाहुतिवैश्वदेवेनयक्ष्ये ॥ ॐभूर्भुवःसुवःपूर्व
वत्परिषिच्य ॥ अग्नयेनमःइत्यलंकृत्य ॥ अदितेनुमन्यस्वेतिपुनःपरिषिच्य ॥ चत्वारिशृंगेतिध्यात्वावरदोभव ॥ गृहसित्थमन्नमादाय ॥ अग्ना
वधिश्रित्य ॥ उदगुद्वास्य ॥ गायत्र्याप्रोक्ष्य ॥ अभिघार्य ॥ ॐअग्नयेस्वाहा ॥ अग्नयइदं ॥ ॐसोमायस्वाहा ॥ सोमायेदं० ।
ॐविश्वेभ्योदेवेभ्यःस्वाहा ॥ विश्वेभ्योदेवेभ्यइदं० ॥ ॐध्रुवायभूमायस्वाहा ॥ ध्रुवायभूमायेदं० ॥ ॐध्रुवक्षितयेस्वाहा ॥ ध्रुवक्षि
तयइदं० ॥ ॐअच्युतक्षितयेस्वाहा ॥ अच्युतक्षितयइ० ॥ ॐअग्नयेस्विष्टकृतेस्वाहा ॥ अग्नयेस्विष्टकृतइदं० ॥ परिषिच्य ॥
वैश्वदेवसाद्गुण्यार्थंव्याहृतिहोमंकरिष्ये ॥ ॐभूस्वाहा ॥ अग्नयइदं० ॥ ॐ[illegible]स्वाहा ॥ वायवइदं० ॥ ॐसुवःस्वाहा । सूर्यायेदं
ॐभूर्भुवःसुवःस्वाहा ॥ प्रजापतयइदं० ॥ ॐअदितेन्वमꣳस्थाः ॥ अनुमतेन्व[illegible]स्थाः ॥ सरस्वतेन्वमꣳस्थाः ॥ देवसवितःप्रासावीः ॥ ॐअ
ग्नेत्वन्नोअंतम०समस्मात् ॥ स्वस्तिश्रद्धांमेधां०श्रुतिः ॥ अनेनषडाहुतिवैश्वदेवाख्येनकर्मणाभगवान्परमेश्वरःप्रीयतांनमम ॥ इतिसपत्नीकपुरुष
स्यअग्नौकरणार्थअग्निसिद्धिवैश्वदेवप्रयोगः ॥ अथब्रह्मचारीविधुरस्नातकश्चाग्निसिद्धिप्र० ॥ आचम्यप्राणाना० ।श्रीपरमेश्वरप्रीत्यर्थप्रतिसां
वत्सरिकश्राद्धांगअग्नौकरणार्थअग्निसिद्धिंक० । यत्राग्निस्थाप्यते०प्राचीरुदक्सꣳस्थाःइतिपूर्ववत् । भूर्भुवःसुवरोमित्यग्निंप्रतिष्ठाप्य०अग्निमिध्वा ।
ॐभूर्भुवःसुवःइत्यग्निंपूर्ववत्परिषिच्य । अग्नयेनमःइत्याद्यलंकृत्य । अदितेनुमन्यस्वेतिपरिषिच्य । परिस्तीर्य । चत्वारिशृंगेतिध्यात्वा ॥ अयाश्चे
तिमंत्रेणैकाज्याहुतिंहुत्वा ॥ ॐअयाश्चा० ॥ अदितेन्वमꣳस्थाःपरिषिच्य । ॐअग्नेत्वंनो०स्मात् । अनेनअग्नौकरणार्थअग्निसिद्धेनभगवान्परमे

श्वरःप्रीयतांनमम ॥ षडाहुतिवैश्वदेवंकुर्यात् ॥ * एवंविधुरदूरभार्याप्रवासीस्नातकब्रह्मचारिणइति ॥ [illegible] ॥ ॥
आचम्य । पवित्रपाणिःप्राणानायम्य । पवित्रवंतःपरिवाचंमासतेपितैषांप्रत्नोअभिरक्षतिव्रतं । महःसमुद्रंवरुणःस्तिरोदधेधीराइच्छेकुर्धरुणेष्वारभं ।
॥ पवित्रेधृत्वा । तिथिर्विष्णुस्तथावारोनक्षत्रंविष्णुरेवच ॥ योगश्चकरणंचैवसर्वंविष्णुमयंजगत् ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतोम०पुण्यति
थौपुरुरवार्द्रवसंज्ञकानांविश्वेषांदेवानां ॥ प्राचीनावीती ॥ अस्मत्पितृपितामहप्रपितामहानां-(अमुकगोत्राणांअमुकशर्मणांवसुरुद्रादित्यस्वरूपा
णां) । प्रतिसांवत्सरिकश्राद्धादौदेहेंद्रियआत्मद्रव्यस्थलगृहभांडभाजनशुध्यर्थंप्रायश्चित्तसूक्तजाप्यमंत्रपठनमहंकरिष्ये । कुरुष्व । सव्यं ॥ यवोदक
तिलोदकंचकरिष्ये ॥ इमंमेगंगेयमुने०मया-(ताम्रपात्रेउदकंनिक्षिप्य) ॥ गंधद्वारादुरा०श्रियं-(इतिगंध) ॥ यवोसिधान्यंराजोवावारुणोमधुसंयु
तः । निर्णोदःसर्वपापानांपवित्रंमृषिभिःस्मृतं-(इतियवान्) ॥ तिलोसिसोमदेवत्योगोसवोदेवनिर्मितः । प्रत्नवद्भिःप्रत्नस्वधएहि । तिलान् । कांडा
त्कांडात्प्ररोहंतीपरुषःपरुषःपरि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनच-(इतिकूर्चंनि[illegible]) ॥ याःफलिनीयाअफलाअपुष्पायाश्चपुष्पिणीः ॥ बृह
स्पतिप्रसूतास्तानोमुंचंत्वꣳहसः-(पूगीफलं) ॥ अग्नेरेतःश्चंद्रꣳहिरण्यमद्भ्यःसंभूतम[illegible]म् ॥ तत्संभरंन्नुतरतोनिधायातिप्रयच्छंदुरितिंतरेयं ॥

टीपः—बृहन्नारदीये——स्नातकाविधुरावास्युयदिवाब्रह्मचारिणः ॥ अग्नौकरणहोमंतुकुर्युस्तेलौकिकेनलः ॥ तैत्तिरीयैब्रह्मचारीस्नातकाविधुरलौकिका
ग्नावेवअयाश्चमंत्रेणेतिसिद्धिकृत्वाहोमः । कार्यःसंस्काररत्नमाला । १ कूर्चप्रमाणः—दर्भपंचाद्विकेसप्तमहालयनवैस्तथा ॥ कूर्चंतुत्रिविधंज्ञेयंशेषंषट्पौरुषं
विदुः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बृहस्पतेजुषस्वनोहव्यानिविश्वदेव्य । रास्वरत्नानिदाशुषे-(इतिहिरण्यं) । यत्रतिलपात्रयोःअयंगंधःइमानिपुष्पाणितुलसीदलसहितानिदर्भपत्राणि ।
कूष्मांडैर्जुहुयाद्योपूतइवमन्येतयथास्तेनोयथाभ्रूणहैवमेषभवतियोयोनौरेतःसिंचतियदर्वाचीनमेनोभ्रूणहत्यायास्तस्मान्मुच्यतेयावदेनोदीक्षामुपैति
दीक्षितएतैःसंततिर्जुहोतिसंवत्सरेदीक्षितोभवातिसंवत्सराद्देवात्मानंपुनीतेमासंदीक्षितोभवतियोमासःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेचतुर्विंश
तिंरात्रीर्दीक्षितोभवतिचतुर्विंशतिरर्धमासाःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेद्वादशरात्रीर्दीक्षितोभवतिद्वादशमासाःसंवत्सरःसंवत्सरादेवात्मानं
पुनीतेषड्रात्रीर्दीक्षितोभवतिषड्वाऋतवःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेतिस्रोरात्रीर्दीक्षितोभवतित्रिपदागायत्रीगायत्रिया एवात्मानंपुनीतेनमांसं
समश्नीयान्नस्त्रियमुपेयान्नोपर्यासीतजुगुप्सेतानृतात्पयोब्राह्मणस्यव्रतंयवागूराजन्यस्यामिक्षावैश्यस्याथौसौम्येप्यध्वरएतद्व्रतंब्रूयाद्यदिमन्येतोपदस्या
मीत्योदनंधानाःसक्तून्घृतमित्यनुव्रतयेदात्मनोनुपदासाय ॥ तिलोदकयवोदकेनमार्जनंकुर्यात् ॥ शुचीवोहव्यामरुतःशुचीनांशुचिंहिनोम्य
ध्वरंशुचिभ्यः ॥ ऋतेनसत्यमृतसापआयन्छुचिजन्मानःशुचयःपावकाः ॥ अग्निःशुचिव्रततमःशुचिर्विप्रःशुचिःकविः ॥ शुचीरोचतआहु
तः ॥ उदग्नेशुचयस्तवशुक्राभ्राजंईरते ॥ तवज्योतींष्यर्चयः ॥ ब्राह्मणेष्वमृतंहितं ॥ येनदेवाःपवित्रेण ॥ आत्मानंपुनतेसदा ॥
तेनसहस्रधारेण ॥ पावमान्यःपुनंतुमा ॥ प्राजापत्यंपवित्रं ॥ शतोद्यामंहिरण्मयं ॥ तेनब्रह्मविदोवयं ॥ पूतंब्रह्मपुनीमहे ॥ इंद्रः
सुनीतिसहमांपुनातु ॥ सोमःस्वस्त्यावरुणःसमीच्यां ॥ यमोराजाप्रमृणाभिःपुनातुमा ॥ जातवेदामोर्जयंत्यापुनातु ॥ अपवित्रःपवित्रो
वासर्वावस्थांगतोपिवा ॥ यस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः ॥ सर्वाणिस्थलानिशुचयोभवंतु-(संतुशुचीनि०) ॥ तिलदर्भहिरण्यं ॥ ३ ॥
गृहीत्वा-(विप्रान्त्रिःप्रदक्षिणीकृत्य) ॥ समस्तसंपत्समवाप्तिहेतवःसमुत्थितापत्कुलधूमकेतवः ॥ अपारसंसारसमुद्रसेतवःपुनंतुमांब्राह्मण

पादपांसवः ॥ आपद्घनध्वांतसहस्रभानवःसमीहितार्थार्पणकामधेनवः ॥ समस्ततीर्थाम्बुपवित्रमूर्तयोरक्षंतुमांब्राह्मणपादपांसवः ॥ विप्रौघः
दर्शनात्क्षिप्रंक्षीयंतेपापराशयः ॥ वंदनान्मंगलावाप्तिरर्चनादच्युतंपदं ॥ आधिव्याधिहरंनृणांमृत्युदारिद्र्यनाशनं ॥ श्रीपुष्टिकीर्तिदंवंदे
विप्रश्रीपादपंकजं ॥ यावंतीर्वैदेवतास्ताःसर्वावेदविदिब्राह्मणेवसंतितस्माद्ब्राह्मणेभ्योवेदविद्भ्योदिवेदिवेनमस्कुर्यान्नाश्लीलंकीर्तयेदेताएवदेवता
प्रीणाति ॥ द्वौनमस्कारौकृत्वा ॥ नमोदेवेभ्यः ॥ अपसव्यं ॥ स्वधापितृभ्यः ॥ पितृपितामहप्रपितामहानांअमुकगोत्राणांअ०
श० ॥ पितुःप्रतिसांवत्सरिकश्राद्धंकर्तुंममाधिकारसंपदस्त्वितिभवंतोब्रुवंतु—(अस्तुश्राद्धादिकारसंपत्) ॥ कालस्यमुख्यकालो
स्त्वितिभवंतोब्रुवंतु—(कालस्यमुख्यकालोस्तु०) ॥ ॥ ॥ पाकदीनांपवित्रतास्त्वितिभवंतोब्रुवंतु—(पाकादीनांपवित्रतास्तु०)
सर्वेपाकाःशुचयोभवंतु ॥ सव्यं । प्राणानायम्य ॥ पुरुरवार्द्रवसंज्ञकानांविश्वेषांदेवानां ॥ अपसव्यं ॥ पितुःप्रतिसांवत्सरिकश्राद्धेपितृपिता
महप्रपितामहानां ॥ गो० श० वसुरुद्रा० ॥ प्रतिसांवत्सरिकश्राद्धंसदैवंसपिंडंसाग्निकरणंशावेगेनविधिनायुष्मदनुज्ञयासद्यःकरिष्ये-(कुरुष्व) ।
सव्यंब्राह्मणवरणंक० । कुरु० । पुरुरवार्द्रवसंज्ञकानांविश्वेषांदेवानांस्थानेत्वयाक्षणःकरणीयः । (सुकरणीयः) । एवंद्वितीयदेवार्थेक्षणःकरणीयः ।
(सुकर०) ॥ अपसव्यं ॥ अस्मत्पितृपितामहप्रपितामहानां ॥ गो०श०वसु०स्थानेत्वयाक्षणःकरणीयः-(सुकरणीयः) । (पित्रर्थेत्वया
क्षणःकरणीयःपितामहस्यत्वया०प्रपितामहस्य०) ॥ सव्यं ॥ अक्रोधनैःशौचपरैःसततंसत्यवादिभिःभवितव्यंभवद्भिश्चमयाचअस्मत्पि
तुःप्रतिसांवत्सरिकश्राद्धकारणात् ॥ (श्राद्धकर्माणि) ॥ * देवपार्श्वस्थानेचतुरस्रमंडलंकृत्वा ॥ अयंगं० । यवाक्षतकुशाः ॥ पुरुरवार्द्रवसंज्ञं

टीपः-१ प्रादेशमात्रंदेवानांउत्तरेचतुरस्रकं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षविश्वेदेवाःआगतंसुस्वागतं ॥ पुरु० देवाःइदंवःपाद्यंब्रह्मणेभूर्भुवःसुवःइदंवःपाद्यं(सुपाद्यं) ॥ शंन्नोदेवीरभिष्टयआपोभवंतुपीतये ॥
शंयोरभिस्रवंतुनः ॥ शुक्रमसिज्योतिरसितेजोसिदेवोवःसवितोत्पुनात्वछिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिः ॥ चरणंपवित्रंविततंपुराणंयेन
पूतस्तरतिदुष्कृतानि ॥ तेनपवित्रेणशुद्धेनपूताअतिपाप्मानमरातिंतरेम ॥ नमोब्रह्मण्यदेवायगोब्राह्मणहितायच ॥ जगद्धितायकृष्णाय
गोविंदायनमोनमः ॥ वंदनान्मंगलावाप्तिः ॥ अपसव्यं ॥ पितृपाद्यस्थानेवर्तुल[illegible]लंकृत्वा ॥ [illegible]यगंधःअयंतिलकुशाःअस्मत्पितृपि०महाः ॥
आगतं-(सुस्वागतं) ॥ गोत्राःपितृपितामहप्रपितामहाः । भूर्भुवःस्वधाइदंवःपाद्यं ॥ [illegible]ण्यनसुपाद्यं ॥ शंन्नोदेवी० ॥ अप० ॥ शुक्रमसि
ज्यो० ॥ सव्यं ॥ चरणंपवि० ॥ वंदनान्मंगलावाप्तिः ॥ हस्तौपादौप्रक्ष[illegible] ॥ ब्राम्हणैसहआचम्य ॥ पुरुरवार्द्रवसंज्ञकाविश्वेदेवा
भूर्भुवःसुवःस्तांअयंवोविष्टरः ॥ अत्रोपविशंतुभवंतः-(अत्रोपविशामः) ॥ [illegible]स० ॥ अस्मत्पितृपितामहप्रपितामहाःभूर्भुवःस्वधास्तांअ
मीतोविष्टरः ॥ अत्रोपविशंतुभवंतः-(अत्रोपविशामः) ॥ विष्टरांतेपवित्रत्यागः ॥ आचम्य ॥ पवित्रेकृत्वा ॥ पवित्रोवनःप० ॥
अद्यपूर्वोच्च०तिथौ ॥ प्राचीनावीतीअस्मत्पितुःप्रतिसांवत्सरिकअपक्रांतश्राद्धकर्मकरिष्ये-कु० ॥ चतुर्दिक्षुयवोदकंप्रोक्षेत् ॥ अपहताअसु
रारक्षांसिपिशाचायेक्षयंतिपृथिवीमनु ॥ अन्यत्रैतोगछंतुयत्रैषांगतंमनः ॥ अप० । दक्षिणतः । चतुर्दिक्षुतिलान्विकीर्य ॥ वातिलोदकंप्रोक्ष्य ।
उदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः ॥ असुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु ॥ सव्यं ॥ गायत्रीमंत्रेणपाकप्रोक्षणं ॥

टीपः—१ वितस्तिमात्रंपितृणांदक्षिणेवर्तुलंभवेत् ॥ २ बहिरंगणेअवटंकृत्वातत्रब्राह्मणानांपादप्रक्षालनं —विश्वप्रकाशः

यद्वोदेवाहेळनंदेवासःचकृमावयं ॥ आदित्यास्तस्मान्मामुंचतर्तस्यर्तेनमामित ॥ देवाजीवनकाम्यायद्वाचानृतमूदिम ॥ तस्मान्नइह
मुंचतविश्वेदेवाःसजोषसः ॥ ऋतेनद्यावापृथिवीऋतेनत्वंसरस्वति ॥ कृतान्नःपाह्येनसोयत्किंचानृतमूदिम ॥ पाकादिनांपवित्रतास्तु ॥
सर्वेपाकाःशुचयोभवंतु ॥ श्राद्धार्थाःसंपादितपदार्थाःदेशतःकालतश्चश्राद्धेहविर्योग्याभवंतु ॥ अप०श्राद्धकालेगयांध्यात्वाध्यात्वादेवंगदाधरं ॥
वस्वादींश्चपितॄन्ध्यात्वाततःश्राद्धंप्रवर्ततेप्रवर्तय ॥ सव्यं ॥ देवताभ्यः ॥ अप० ॥ पितृभ्यश्चनमःस्वाहायैस्वधायैनित्यमेवनमोनमोनित्यमे
वनमोनमः ॥ सव्यं ॥ पुरुरवा०ब्रह्मणेभूर्भुवःसुवः-इदमासनं ॥ स्वासनं ॥ आस्यतांधर्मोसिआपः ॥ दैवेक्षणःक्रियतां ॥ ॐतथा ॥ प्राप्नो
तुभवान्प्राप्नवानि ॥ भूमिंप्रोक्ष्य ॥ दर्भानास्तीर्य ॥ पात्राद्वयंन्युब्जंनिधाय ॥ प्रोक्ष्य ॥ उत्तानेप्रोक्ष्य ॥ यवान्विकीर्यदर्भांतर्हितेष्व
पआसिच्य ॥ तूष्णींउदकमापूर्य ॥ शन्नोदेवीत्यभिमंत्र्य ॥ शंन्नोदेवी० ॥ [illegible]सिधान्य० ॥ अर्घ्यपात्रयोश्चयंगंधः । इमानिवःपुष्पाणि
तुलसीदलानि ॥ विश्वेभ्योदेवेभ्योवोजुष्टंगृण्हामि २ इतिमंत्रेणार्घ्यपात्रयोःकुशं[illegible]यित्वानिरस्य ॥ देवपात्रेसंपन्नेसुसंपन्नेस्वाहार्घ्यःसं
त्वर्घ्यौ ॥ पुरूरवार्द्रवसंज्ञकाविश्वान्देवान्भवत्स्वावाहयिष्ये-(आवाहय) ॥ [illegible]विश्वेदेवासआगंतश्रृणुतामइमंहवं ॥ एदंबर्हिर्निषीद
त ॥ विश्वेदेवाःश्रृणुतेमंहवंमेयेअंतरिक्षेयउपद्यविष्ठ ॥ येअग्निजिव्हाउतवायजत्रा आसद्यास्मिन्[illegible]र्हिषिमादयध्वं ॥ आगछंतुमहाभागावि
श्वेदेवामहाबलाः ॥ येअत्रविहिताश्राद्धेसावधानाभवंतुते-(सावधानोऽस्तु) ॥ यादिव्याआपःपयसासंबभूवुर्याअंतरिक्षउतपार्थिवीर्याः ।
हिरण्यवर्णायज्ञियास्तानआपःशंस्योनासुहवाभवंतु ॥ पुरूरवार्द्रवसंज्ञकाविश्वेदेवाःइदंवोअर्घ्यं-(अस्त्वर्घ्यं) ॥ पात्रेस्थानेस्था ॥ ततःशुद्धोदकं ।
अर्चंतप्रार्चतप्रियमेधासोअर्चत ॥ अर्चंतुपुत्रकाउतपुरंनधृष्ण्वर्चत ॥ पुरूरवा०[illegible]गंधाःअमीवोगंधाः-(सुगंधाः) ॥ स्वाहानमोनमम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयंनेतेपरायंणेदूर्वीरोहंतुपुष्पिणीः । न्हदाश्चपुंडरीकाणिसमुद्रस्यंगृहाइमे । माल्यार्थेइमानिवःपुष्पाणि–सुपुष्पाणि । स्वाहानमोनमम ॥ धूरंसि
धूर्वधूर्वंतंधूर्वतंयोस्मान्धूर्वतितंधूर्वयंवयंधूर्वामः ॥ उदकेनैवसांकल्पितंवोधूपः–(सुधूपः) ॥ उद्दीप्यस्वजातवेदोपघ्रंनिर्ऋतिंमम ॥ पशूंश्चमह्यमावह
जीवनंचदिशोदिश ॥ ज्वालाभिधेगृहस्थितंवोज्योतिः–(सुज्योति) ॥ अनुलेपनार्थेगोपीचंदनं–(सुचंदनं) ॥ धारणार्थेयज्ञोपवीतं–(सूप
वीतं) ॥ फलार्थेपूगफलं–(सुफलं) ॥ आछादनार्थेकिंचिद्धिरण्यं ॥ पवित्रार्थेइमौकुशौ–(अस्तुपवित्रं) ॥ युवांसुवासाःपरिवीतआ
गात्सउश्रेयान्भवतिजायमानः ॥ तंधीरासःकवयउन्नयंतिस्वाधियोमनसादेवयंतः ॥ ...भ्यःएतानिगंधपुष्पधूपदीपआछादनांताःपंचोपचाराः
सर्वेसंपूर्णाभवंतु ॥ अर्चनविधौष्वर्चितमस्तु ॥ युष्मदनुज्ञेयादेवाद्यर्चनंसंपूर्णं ॥ अपसव्यं ॥ पित्राद्यर्चनंकरिष्ये–(कुरुष्व) ॥ पितृपि
तामहप्रपितामहानांगोत्रा०श०वसुरुद्रादित्यस्वरूपाणां ॥ ब्रह्मणेभूर्भुवःस्वधाइदमासनं–(स्वासनं) ॥ आस्यतांधर्मोसिअपः ॥ प्रतिसां
वत्सरिकश्राद्धेपित्र्येक्षणःक्रीयतां ॥ ओंतथा ॥ प्राप्नोतुभवान्–प्राप्नवानि ॥ भूमिंप्रोक्ष्य ॥ दक्षिणाग्रांदर्भानास्तीर्य ॥ तत्र
पात्रत्रयंन्युब्जंनिधाय ॥ गायत्र्याप्रोक्ष्य ॥ उधृत्य ॥ उत्तानेप्रोक्ष्य ॥ दक्षिणाग्रान्दर्भान्निधाय ॥ उदकंपूरयित्वा ॥ शंन्नोदेवी
त्यभिमंत्र्य ॥ शन्नोदेवी० ॥ तिलोसिसोम०एहि । अस्मत्पितरंअमुकगोत्रंअ०शर्माणंवसुरूपंइमान्लोकान्प्रीणयाहिनस्वधानमः । एवं ।
पितामहं० ॥ प्रपितामहं०–(प्रतिमंत्रंप्रतिपात्रेतिलान्निक्षिप्य) ॥ अर्घ्यपात्रेषुअयंगंधःइमानिपुष्पाणितुलसीदलानी ॥ सर्वेउपचाराःतिलैः
संपूर्णाःसंतु ॥ पितृपात्रेतेवोजुष्टंगृण्हामिपितामहपात्रे०प्रपितामहपात्रेतेवो०अर्घ्यपात्रेषुदर्भंभ्रामइत्वा ॥ अर्घ्यपात्राणिसंपन्नानिसुसंपन्ना
नि ॥ स्वधार्घ्यःसंत्वर्घ्यः ॥ अस्मत्पितृपितामहप्रपितामहान्अमुकगोत्रान्अमुकशर्मणःवसु०पान् ॥ भवत्सुआवाहयिष्ये–आवाहया ॥

उशंतस्त्वाहवामहउशंतःसमिधीमहि ॥ उशंन्नुशतआवहपितृन्हविषेअत्तवे ॥ आयंतुनःपितरःसोम्यासोग्निष्वात्ता पथिभिर्देवयानैः ॥ अस्मि
न्यज्ञेस्वधयामदंत्वधिब्रुवंतुतेअवंत्वस्मान्–(हस्तेतिलान्गृहीत्वाप्रतिविप्रमावाह्य) ॥ सावधानाभवंतुते–(सावधानोस्तु) ॥ यादिव्याआपःपयं
सा०भवंतु ॥ अस्मत्पितःगोत्रशर्मन्वसुरूपइदंतेर्घ्यं–(अस्त्वर्घ्यं) ॥ एवंपितामह०गो०श०रु०इदंतेर्घ्यंप्रपितामहः०गो०श०आ०इदंतेर्घ्यं–ततः
शुद्धोदकं ॥ अर्चंतप्रार्चत्० ॥ गंधद्वारां० ॥ पितृपितामहप्रपितामहाःयथाभागशःअमीतेगंधाः–(सुगंधाः)आयंनेते० ॥ माल्यार्थेइमानि
वपुष्पाणि–(सुपुष्पाणि) ॥ धूरसिधूर्व०धूपः–(सुधूपः) ॥ उद्दीप्यस्वजात० ॥ सूर्यस्थितंवोज्योतिः–(सुज्योतिः) ॥ अनुलेप
नार्थेगोपीचंदनं–(सुचंदनं) ॥ धारणार्थेयज्ञोपवीतं–(सूपवीतं) ॥ फलार्थेपूगफलं–(सुफलं) ॥ आछादनार्थेकिंचिद्धिरण्यं ॥ पवित्रा
र्थेइमेकुशाः–(अस्तुपवित्रं) ॥ इदंपितृभ्योनमोअस्त्वद्ययेपूर्वासोयउपरासईयुः ॥ येपार्थिवेरजस्यानिषत्तायेवानून सुवृजनासुविक्षु ॥ पितृ
पितामहप्रपितामहाःएतेअत्रगंधपुष्पधूपदीपआछादनांताःपंचोपचाराःसर्वेसंपूर्णाभवंतु ॥ अर्चनविधेष्वर्चितमस्तु । युष्मदनुज्ञेयापित्राद्यर्चनंसंपूर्णं ।
सव्यं ॥ विष्णोस्मरणपर्वकंमंडलादिपात्रासादनंकरिष्ये–(कुरुष्व) ॥ देवस्थानेचतुरस्रमंडलंकृत्वा ॥ अपसव्यं ॥ पितृपात्रस्थानेवर्तुलमंड
लंकृत्वा ॥ भोजनपात्राणिस्थापयेत् ॥ अद्य०पुण्यतिथौअस्मत्पितुःप्रतिसांवत्सरिकश्राद्धेभवदनुज्ञयाअग्नावग्नौकरणंकरिष्ये–(क्रीयतां) ॥ अ
ग्नौकरणार्थंपात्रस्थमन्नमादाय ॥ गायत्र्याप्रोक्ष्य ॥ अभिघार्य ॥ अन्नंचतुर्भागंकृत्वा ॥ ईशान्यभागेअभिघार्य ॥ तूष्णींअग्निंपरिषिच्य ॥
अग्नेश्चतुर्दिक्षुदर्भान्परिस्तीर्य ॥ उपवीती ॥ सोमायपितृपीतायस्वधानमःस्वाहा ॥ अप० ॥ सोमायपितृपीतायेदं० ॥ उप० ॥ अग्नयेक
व्यवाहनायस्वधानमःस्वाहाअप० ॥ अग्नयेकव्यवाहनायेदं० ॥ तूष्णींअप्रदक्षिणंपरिषिच्य ॥ पितृपात्रेअभिघार्य ॥ स्वधेयंअस्तुस्वधा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यन्नंदद्यात्-(द्विवारं) ॥ आस्त्रधेत्याश्रावयति ॥ अस्तुस्त्रधेतिप्रत्याश्रावयति ॥ स्वधानमइतिवषट्करोतिस्वधाकारोहिपितृणां ॥ सव्यं ॥ मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतायजातमग्निं ॥ कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः ॥ इतिमंत्रेणदेवपात्रेअभिघार्य ॥ आमासुपक्वमैरयआसूर्यꣳरोहयोदिवि ॥ घर्मंनसामंतपतासुवृक्तिभिर्जुष्टंगिर्वणसेगिरः ॥ सोमोधेनुꣳसोमोअर्वंतमाशुꣳसोमोवीरंकर्मण्यंददातु ॥ सादन्यंविदथ्यꣳसभेयंपितुःश्रवणंयोददाशदस्मै । पितृपात्रेअभिघार्य । देवपूर्वकमन्नं परिवेष्य । ...शुध्यर्थंअन्नसूक्तंपठेत् । आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसीजायतामास्मिन्राष्ट्रेराजन्यइषव्यःशूरोमहारथोजायतांदोग्ध्रीधेनुर्वोढानड्वा...आशुः...पुरंधिर्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमान स्यवीरोजायतांनिकामेनिकामेनःपर्जन्योवर्षतुफलिन्योनओषधयःपच्यंतांयोगक्षेमोनः...ताम् । आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामित्याह । ब्राह्म णएवब्रह्मवर्चसंदधाति ॥ तस्मात्पुराब्राह्मणोब्रह्मवर्चस्यजायत ॥ आस्मिन्राष्ट्रे...न्यइषव्यःशूरोमहारथोजायतामित्याह ॥ राजन्यएवशौर्यम हिमानंदधाति ॥ तस्मात्पुराराजन्यइषव्यःशूरोमहारथोजायत ॥ दोग्ध्रीधेनुरित्याह ॥ धेन्वामेवपयोदधाति ॥ तस्मात्पुरादोग्ध्रीधेनुरजायत ॥ वोढानड्वानित्याह ॥ अनडुह्येववीर्यंदधाति ॥ तस्मात्पुरावोढानड्वानजायत ॥ आशुःसप्तिरित्याह ॥ अश्वएवजवंदधाति ॥ तस्मात्पुराशुर श्वोजायत ॥ पुरंधिर्योषेत्याह ॥ योषित्येवरूपंदधाति ॥ तस्मात्स्त्रीयुवतिःप्रियाभावुका ॥ जिष्णूरथेष्ठाइत्याह ॥ आहवैतत्रजिष्णु रथेष्ठाजायते ॥ यत्रैतेनयज्ञेनयजंते ॥ सभेयोयुवेत्याह ॥ योवैपूर्ववयसी ॥ ससभेयोयुवा ॥ तस्माद्युवापुमान्प्रियोभावुकः ॥ आस्य यजमानस्यवीरोजायतामित्याह ॥ आहवैतत्रयजमानस्यवीरोजायते ॥ यत्रैतेनयज्ञे० ॥ निकामेनिकामेनःपर्जन्योवर्षत्वित्याह ॥ निकामेनिका मेहवैतत्रपर्जन्योवर्षति ॥ यत्रैतेनयज्ञेन० ॥ फलिन्योनओषधयःपच्यंतामित्याह ॥ फलिन्योहवैतत्रौषधयःपच्यंते ॥ यत्रैतेनयज्ञेन० ॥

योगक्षेमोनःकल्पतामित्याह ॥ कल्पतेहवैतत्रप्रजाभ्योयोगक्षेमः ॥ यत्रैतेनयज्ञेनयजंते ॥ नमःककुभायनिषंगिणेस्तेनानांपतयेनमः ॥ नमोनि षंगिणइषुधिमतेतस्कराणांपतयेनमः ॥ नमोनिषंगिणेचेषुधिमतेच ॥ येतीर्थानिप्रचरंतिसृकावंतोनिषंगिणः ॥ तेषाꣳसहस्रयोजनेवधन्वा नितन्मसि ॥ सइषुहस्तैःसनिषंगिभिर्वशीसꣳस्रष्टासयुधइंद्रोगणेन ॥ सꣳसृष्टजित्सोमपाबाहुशर्ध्यूर्ध्वधन्वाप्रतिहिताभिरस्ता १ इत्यन्नसूक्तं ॥ गायत्रीमंत्रेणपात्रस्थमन्नंप्रोक्ष्य ॥ सत्यंत्वर्तेनपरिषिंचामि ॥ देवपात्रेयवोदकेनप्रदक्षिणंपरिषिच्य ॥ पृथ्वीतेपात्रंद्यौरपिधानंब्राह्मणस्त्वा मुखेअमृतेमृतंजुहोमिस्वाहाब्राह्मणानांत्वाविद्यावतांप्राणापानयोर्जुहोम्यक्षितमसिमैषांक्षेष्ठाअमुत्रामुष्मिंलोके ॥ इदंविष्णुर्वि०मुरे ॥ स्वाहा श्रीविष्णोहव्यंरक्षस्वपुरूरवा०देवाःएतद्वोहव्यंसपरिकरंब्राह्मणस्त्वाहवनीयार्थेदत्तंदास्यमानंचआतृप्तःतत्सर्वंगयइयंभूमिगयागदाधरोभोक्ताभोक्ता चब्रह्माब्रह्मरूपमन्नंकल्पितसौवर्णपात्रस्थितमन्नंअक्षय्यवटच्छायेयं-(अंगुष्ठेनान्नमुप...यति) ॥ पुरूरवार्द्रवसंज्ञिकेभ्योविश्वेभ्योदेवेभ्यःइदमिद मन्नंशक्त्योपस्कारसहितंअमृतरूपेणस्वाहासंपद्यतांहव्यंनमम ॥ गयायांश्रीविष्णुपदे...मक्षय्यमस्त्वितिभवंतोब्रुवंतु ॥-गयायांविष्णुपदेद त्तमस्तु ॥ येदेवादिव्येकादशस्थपृथिव्यामध्येकादशस्थ ॥ अप्सुषदोमहिनैकादश यतेदेवायज्ञमिमंजुषध्वं ॥ विश्वेदेवास्तुष्टावरदाभवंतु ॥ एवंद्वितीयदेवपात्रे ॥ पितृपात्रेगायत्र्यामन्नंप्रोक्ष्य ॥ अपसव्यं ॥ सत्यंत्वर्तेनपरिषिंचामि ॥ पृथ्वीतेपात्रं०स्वधाश्री विष्णोःकव्यंइक्षस्व ॥ अस्मत्पितृपितामहप्रपितामहोदेवताःएतद्वःकव्यंसपरीकरंदत्तंदास्यमानंचआतृप्तेःतत्स...यइयंभूमिगयागदाधरोभोक्ताभो क्ताचब्रह्माब्रह्मरूपमन्नंकल्पितरजतपात्रस्थितमन्नंअक्षय्यवटछायेयं ॥ पितृपिता०भ्यःगोत्रेभ्यःशर्मभ्यःइदमिदमन्नंअमृतरूपेणसंपद्यतांस्वधाक व्यंनमम ॥ गयायांश्रीरुद्रपादादिसमस्तपादेषुदत्तमस्तु ॥ गयागदाधरःप्रीतो...तु ॥ येचेहपितरोयेचनेहयाꣳश्चविद्मयाꣳउचनप्रविद्म ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्नेतान्वेत्थयतितेजातवेदस्तयाप्रत्त ँस्वधयामदंतुस्वधानमः । पितृभ्यःयथासांकल्पि[illegible]न्नंप्रीयतां । सव्यं ॥ ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहु
तं ॥ ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिना ॥ हरिर्दाताहरिर्भोक्ताहरिरन्नंप्रजापतिः ॥ हरिर्विप्रशरीरस्थोभुंक्तेभोजयतेहरिः ॥ चतुर्भिश्चच
तुर्भिश्चद्वाभ्यांपंचभिरेवच ॥ हुयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदतु ॥ तत्सत्ब्रह्मार्पणमस्तु ॥ देशकालपात्रअंतंत्रकर्तृभोक्तृद्रव्यैःसर्वंन्यूनातिरि
क्तान्यछिद्रमस्त्वितिभवंतोब्रुवंतु ॥ सर्वंन्यूनातिरिक्तान्यछिद्रमस्तु ॥ अद्य०पुण्य[illegible]थौ ॥ प्राचीनावीती ॥ पितृपितामहप्रपितामहानगोत्रा
न्शर्मणःवसुरुद्रादित्यस्वरूपान्तान्उदिश्यमयाक्रियमाणेनप्रतिसांवत्सरिकश्राद्धान्नप्र[illegible]नेनपितृपितामहप्रपितामाहानांगोत्राणांशर्मणांवसुरुद्रा०
णांएतेषांसर्वेसकलंभूत्वापुनरावृत्तिरहितशाश्वतब्रह्मलोकावाप्तिरस्त्वितिभवंतोब्रुवंतु [illegible]तंपुनरावृत्तिरहितशाश्वतब्रह्मलोकावाप्तिरस्तु ॥ सव्यं
मधुवातांऋता०भंवंतुनः ॥ मधुमधुमधुं ॥ सर्वमध्वस्तु ॥ ईशानविष्णुकमल[illegible]नकार्तिकेयवन्हित्रयार्करजनीशगणेश्वराणां ॥ क्रौंचाम
रैंद्रकलशोद्भवकश्यपानांसभ्यावसथ्यदधिकण्वमतंगवानां ॥ संध्यात्रयाम्रवटफल्गुगदाधराणांपादांनमामिसततंपितृमुक्तिहेतोः ॥ गयायैनमः ।
गदाधरायनमः ॥ पुंडरीकाक्षाय० । काशीविश्वेश्वराय० ॥ गयेयंगयेयं ॥ देवतानैवेद्यं ॥ अपसव्यं ॥ एकोविष्णुर्महद्भूतपृथक्भू
तान्यनेकशः ॥ त्रीन्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभुगव्ययः ॥ अनेनममपितुःप्रतिसांवत्सरिकश्राद्धीयब्राह्मणभोजनेनपितृ०स्वरूपीश्रीमज्ज
नार्दनवासुदेवःप्रीयतां० ॥ सव्यं ॥ देवेभ्यःतत्सत्अमृतमस्तु ॥ अपसव्यं ॥ स्वधापितृभ्यःतत्सत्अमृतमस्तु ॥ श्रद्धायांप्राणेनिविष्टो
मृतंजुहोमि ॥ श्रद्धायामपानेनि० । श्रद्धायांव्यानेनि० ॥ श्रद्धायामुदानेनि० । श्रद्धायां ँसमानेनिविष्टोमृतंजुहोमि ॥ ब्रह्मणिमआ
त्मामृतत्वाय ॥ इतिजदंन । अप०पितृपूर्वकंपूर्वापोशनार्थउदकंदत्वा ॥ सव्यंदेवानां ॥ अमृतोपस्तरणमसि ॥ श्रद्धायांप्राणेनिविष्टोमृतंजुहोमि ॥

शिवोमाविशाप्रदाहाय ॥ प्राणायस्वाहा ॥ श्रद्धायामप[illegible]निवि० ॥ अपानायस्वाहा ॥ श्रद्धायांव्यानेनिवि० । व्यानायस्वाहा ॥
श्रद्धायामुदानेनिवि० ॥ उदानायस्वाहा ॥ श्रद्धायां ँसमानेनिवि०हाय ॥ समानायस्वाहा ॥ ब्रह्मणिमआत्मामृतत्वाय ॥ नेत्रस्प
र्शार्थउदकंदत्वा ॥ दशगायत्रींजपे[illegible] अपेक्षितंयाचितव्यंत्याज्यंचैवानुपेक्षितं ॥ उपविश्यसुखेनैवभोक्तव्यंस्वस्थमानसैः ॥ विद्यमानशाक
पाकादिपदार्थेषुयद्रोचतेतद्ग्राह्यंयन्नरोचतेत[illegible]यथासुखं[illegible]ष्वं ॥–जुषामहे ॥ अभिश्रवणसूक्तानिपठेत् ॥ राक्षोघ्नान्पितृलिंगकान्सूक्तान्श्राव
यिष्ये–(आश्रावया) ॥ दवताभ्यःपितृभ्यश्चम[illegible]योगिभ्य[illegible]वच ॥ नमस्वाहायैस्वधायैनित्यमेवनमोनमोनित्यमेवनमोनमः ॥ ईशानःपितृरूपे
णमहादेवोमहेश्वरः ॥ प्रीयतांभगवानीशःपरमात्मासद[illegible] ॥ सप्तव्याधादशारण्येमृगाःकालंजनेगिरौ ॥ चक्रवाकाःसरोद्वीपेहंसाःसरसि
मानसि ॥ तेपिजाताकुरुक्षेत्रेब्राह्मणावेदपारगाः ॥ प्रस्थि[illegible]र्घिमध्वान्नंयूयंकिमवसीदथ ॥ अमूर्तानांचमूर्तानांपितृणांदीप्यतेजसा । नमस्यामि
सदातेषांध्यानीनांयोगचक्षुषा ॥ चतुर्भिश्च०प्रसीदतु ॥ भोजनांतेविकिरंदद्यात् ॥ अप०असंस्कृतप्रमीतानांत्यागिनांकुलभागिनां ॥ उच्छिष्टभागधे
यानांविकिरेषुदर्भासनं ॥–इतिमंत्रेणदेवपितृपात्रयोर्मध्येदर्भानास्तीर्य ॥ सव्यं ॥ मधुवाताऋता०तुनः ॥ अप० ॥ अक्षन्नमी०हरी ॥ सव्यं ॥
मधुमधुश्राद्धंसपन्नं–(सुसंपन्नं) ॥ विश्वेदेवाःतृप्तास्थः ।–(तृप्ताः स्मः) ॥ अप० । पितृ०महाःमधु०सपन्नं–सु० ॥ पितृ०तृप्तास्थः– तृप्ताःस्मः ॥
असंस्कृतप्रमीतायैत्यागिन्योयाःकुलस्त्रियः ॥ दास्यामितेभ्योविकिरमन्नंताभ्यश्चपैतृकं ॥ तदुपरितिलोदकंदत्तंनमम ॥ सव्य ॥ असो
मपाश्चयेदेवायज्ञभागविवर्जिताः । तेषामन्नंप्रदास्यामिविकिरंवैश्वदैविकं । यवोदकंदत्तंनमम । विकिरंदद्यात् ॥ येअग्निदग्धायेनाग्निदग्धायेवाजाताः
कुलेमम ॥ भूमौदत्तेनंपिंडेनतृप्तायांतुपरांगतिं ॥ येअग्निदग्धेभ्यःयेअनाग्निदग्धेभ्यःअस्मत्कुलप्रसूतेभ्योजीवेभ्यःअयंउच्छिष्टपिंडंस्वधानमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निदग्धाअनग्निदग्धाश्चमार्जयंतां ॥ हस्तौपादौप्रक्षाल्याचम्यपवित्रत्यागः ॥ आचम्यपवित्रेधृत्वा ॥ पवित्रवंतःप॰रभं ॥ शेषमुच्छिष्टमग्भ्यो
ंदीयतां ॥ यजमानकुलेजातादासादास्योनकांक्षिणः ॥ तेसर्वेतृप्तिमायांतुमयादत्तेनभूतले ॥ अप॰ ॥ …वत्उत्तरापोशनार्थमुदकंदत्वा
अमृतापिधानमसि ॥ श्रद्धायांप्राणेनिविश्यामृतं॰हुतं ॥ प्राणमन्नेनाप्यायस्व ॥ श्रद्धायामपानेनिविश्यामृतं॰हुतं ॥ अपानमन्नेनाप्यायस्व ॥
श्रद्धायांव्यानेनिविश्यामृतं॰हुतं ॥ व्यानमन्नेनाप्यायस्व ॥ श्रद्धायामुदानेनिविश्यामृतं॰हुतं ॥ उदानमन्नेनाप्यायस्व ॥ श्रद्धायां॰स
मानेनिविश्यामृतं॰हुतं ॥ समानमन्नेनाप्यायस्व ॥ अंगुष्ठमात्रःपुरुषोंगुष्ठंचसमाश्रि… ॥ ईशःसर्वस्यजगतःप्रभुःप्रीणातिविश्वभुक् ॥ रौरवे
पूयनिलयेपद्मार्बुदनिवासिनां ॥ अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठतु ॥ अत्रपूर्वां…तथातिथौ ॥ प्राचीनावीती ॥ पितुःप्रतिसांवत्सरिक
श्राद्धीयतिलोदकपिंडप्रदानंकरिष्ये—कुरु॰ ॥ अपांमेध्यंयज्ञियं॰सदेवं॰शिवमस्तुमे ॥ आछेत्तावोमारिषंजीवातिशरदःशतं ॥ आछिनत्ति ॥
अपहतासुरारक्षां॰सिपिशाचावेदिषदः ॥ इत्यद्भिरवोक्ष्य ॥ आयंतुपितरोमनोजवसः ॥ इत्याभिमंत्र्य ॥ सकृदाछिन्नंदर्भैरवस्तीर्य ॥
सकृदाछिन्नंबर्हिरूर्णामृदुस्योनंपितृभ्यस्त्वाभराम्यहं ॥ अस्मिन्त्सीदंतुमेपितरःसोम्याःपितामहाःप्रपितामहाश्चानुगैःसह ॥ इत्यास्तृणाति ॥
मार्जयंतांपितरोमार्जयंतांपितामहोमार्जयंतांप्रपितामहोमार्जयंतां ॥ एतत्तेअस्मत्पिताअमुकगोत्रअमुकशर्मन्वसुरूपयेचत्वामनु ॥ पित्रेगोत्रायश
र्मणेवसुरूपाययेचतमनुगच्छंतितेभ्यश्चअयंपिंडतस्मैतेस्वधानमः गयायांविष्णुपदेदत्तमस्तु ॥ तदुपरितिलोदकदत्तंनमम ॥ एवंसर्वत्र ॥ यन्मे
माताप्रममादयच्चचारानंनुव्रतं ॥ तन्मेरेतःपितावृंक्तामाभुरन्योपपद्यतां ॥ पितृभ्यःस्वधाविभ्यःस्वधानमः ॥ पितामहेभ्यःस्वधा॰नमः ।
प्रपितामहेभ्यःस्वधा॰नमः ॥ अत्रपितरोयथाभागमंदध्वं ॥ (अक्षन्नापितरःअमीमदंतपितरःअतीतपंतपितरःपितरःशुधध्वं) ॥ अमी

मदंतपितरःसोम्याः ॥ येसमानाःसमनसःपितरोयमराज्ये ॥ तेषांलोकस्स्वधानमोयज्ञोदेवेषुकल्पतां ॥ येसंजाताःसमनसोजीवाजीवेषु
मामकाः ॥ तेषां॰श्रीर्मयिकल्पतामस्मिन्लोकेशत॰समाः ॥ वीरंधत्तपितरः ॥ शेषमन्नंअवघ्राय ॥ पवित्रत्यागः ॥ हस्तौपादौप्रक्षाल्या
च्यम्य ॥ पवित्रेधृत्वा ॥ मार्जयंतांपितरोमार्जयंतांपितामहोमार्जयंतांप्रपितामहोमार्जयंतां ॥ पितःअभ्यंक्ष्वपितामहअभ्यंक्ष्वप्रपितामह
अभ्यंक्ष्व ॥ अंक्षंक्ष्वेतिकज्जलं ॥ एतानिवःपितरोवासा॰स्यतोनोन्यत्पितरोमायोष्ठपितामहमायोष्ठप्रपितामहमायोष्ठवाससोदशांछित्वापिंडेषु
निदधाति ॥ नमस्कारायेतेमंत्राः ॥ नमोवःपितरोरसायनमोवःपितरःशुष्मायनमोवःपितरोजीवायनमोवःपितरःस्वधायनमोवःपितरोमन्यवेन
मोवःपितरोघोरायपितरोनमोवोयएतस्मिंलोकेस्थयुष्मां॰स्तेनुयेस्मिंलोकेमांतेनुयएतस्मिंलोकेस्थयूयंतेषांवसिष्ठाभूयास्तयेस्मिंलोकेहंतेषांवसिष्ठोभू
यासं ॥ गृहान्नःपितरोदत्तसदोवःपितरोदेष्म ॥ ऊर्जंवहंतीरमृतंघृतंपयःकीलालंपरिस्रुतं ॥ स्वधास्थतर्पयंतमेपितॄन्तृप्यततृप्यत ॥ परेतपि
तरःसोम्यागंभीरैःपथिभिःपूर्व्यैः ॥ अथापितॄन्सुविदत्रां॰अपीतयमेनयेसधमादंमदंति ॥ मनोन्वाहुवामहेनाराशं॰सेनस्तोमेनपितॄणांचमन्मभिः ।
आनएतुमनःपुनःक्रत्वेदक्षायजीवसे ॥ ज्योक्चसूर्यंदृशे ॥ पुनर्नःपितरोमनोददातुदैव्योजनः ॥ जीवंव्रातं॰सचेमहि ॥ यदंतरिक्षंपृथिवीं
मुतद्यांयन्मातरंपितरंवाजिहिं॰सिम ॥ अग्निर्मातस्मादेनसःप्रमुंचतुदुरितायानिचकृमकरोतुमामनेनसं …व्यं ॥ कुलाभिवृद्ध्यर्थंसव्येनपिंडपूजांक
रिष्ये ॥ पिंडस्थपितरःपाद्यंस्वधा ॥ अर्घ्यं॰आचमनीयं॰स्नानीयं॰स्वधा ॥ गंधं॰तिलाक्षतानयथार्हं ॥ …न॰पुष्पाणि॰तुलसी॰भृंगराजप
त्राणि॰धूपं॰दीपं॰नैवेद्यं॰तांबूलं॰दक्षिणां॰उत्तरनीराजनदीपं॰कर्पूरदीपं॰मंत्रपुष्पंस्वधा ॥ अद्य॰वर्तमानव्यावहारिकचांद्रमान॰पुण्यतिथौ ।
प्राचीनावीती ॥ पितृपि॰महान्गोत्रान्शर्मणःवसुरु॰पानतान्उद्दिश्यमयाक्रियमाणे पितुःप्रतिसांव॰श्राद्धीयतिलोदकपिंडप्रदानेनपितृपि॰नः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोत्रोणांशर्मणांवसुरु०पाणांएतेषांसर्वेसकलंभूत्वा गयापिंडेनैवाक्षय्यातृप्तिर्भूत्वामयाद्दत्ताःपिंडाःगयापिंडतुल्यफलसदृशमस्त्विति भवंतोब्रुवंतु ॥
–गयापिंडतुल्यफलसदृशमस्तु ॥ आत्मालंकारः ॥ पिंडान्नमस्कृत्य ॥ पिंडानुद्वासयिष्ये ॥ उद्वासय ॥ अयोध्यामथुरामायाकाशीकां
चीअवंतिका ॥ पुरीद्वारवताचैवसप्तैतामोक्षदायकाः ॥ शमीपत्रप्रमाणेनपिंडदद्या[illegible]याशिरे ॥ उद्धरे[illegible]गोत्राणिकुलमेकोत्तरंशतं ॥ तद्वि
ष्णोःपरमंपदंसदापश्यंतिसूरयः ॥ दिवीवचक्षुराततं ॥ तद्विप्रासोविपन्यवोजा[illegible]वांसःसमिंधते ॥ विष्णोर्यत्परमंपदं ॥ पिंडस्थानेशां
तिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ स्वस्थानेवासः ॥ अन्यस्थाने[illegible] ॥ देवाःसुप्रोक्षितमस्तु ॥ अस्तुसुप्रोक्षितं ॥
शिवाआपःसंतु–संतुशिवाआपः ॥ यवाःपांतु ॥ पांतुयवाः ॥ दीर्घमायु[illegible]ःशांतिःपुष्टिःतुष्टिःश्चातु ॥ अप० ॥ पितरःसुप्रो
क्षितम०–अस्तुसुप्रोक्षितं० ॥ तिलाःपांतु–पांतुतिलाः ॥ देवाःपितरःपितरोदेवाः ॥ देवतापितृप्रसादेनगोत्रंवर्धतांस्वस्तिवर्धतां ॥ वि
श्वेदेवप्रसादोस्तु ॥ पितृप्रसादोस्तु ॥ देवाःस्वस्तीतिब्रूतास्वस्ति ॥ अप० । पितरश्चस्वस्तीतिब्रूतास्वस्ति ॥ भोजनपात्राण्युच्चालयिष्ये–उच्चा
लय । सव्यं । देवाःयद्दत्तंश्राद्धमुदकमन्नमस्त्वितिब्रूता त्वक्षय्योदकं । अ० ॥ पितरःयद्दत्तंश्राद्धमु०ब्रूतास्त्वक्षय्योदकं ॥ स० ॥ उपविष्टेभ्यो
ब्राह्मणेभ्यःश्राद्धभोजनसाद्गुण्यार्थंतांबूलपूर्वकदाक्षिणाःपांतु–पांतुदाक्षिणाः ॥ स्वधांवाचयिष्ये–वाच्यतां ॥ कूर्चविसर्जनं ॥ कृचेत्वारुचे
त्वासमित्स्रवंतिसरितोनधेनाः ॥ अंतर्हृदामनसापूयमानाः ॥ घृतस्यधाराअभिचाकशीमि ॥ हिरण्ययोवेतसोमध्यआसां ॥ तस्मिन्त्सु
पर्णोमधुकृत्कुलायीभजन्नास्तेमधुदेवताभ्यः ॥ तस्यासतेहरयःसप्ततीरे स्वधांदुहानाअमृतस्यधारां ॥ अप० ॥ वाजेवाजेवतवाजिनोनोधनेषु
विप्राअमृताऋतज्ञाः ॥ अस्यमध्वःपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः ॥ उत्तिष्ठंतुपितरः ॥ सव्येनविश्वेदेवैःसह ॥ आमावाजस्य

प्रसवोजगम्यादाद्यावापृथिवीविश्वशंभूः ॥ आमागंतांपितरामातराचमासोमोअमृतत्वायगम्याः ॥ दातारोनोभिवर्धंतांवेदाःसंततिरेवनः ॥
श्रद्धाचनोमाव्यगमद्बहुधेयंचनोस्तु ॥ अन्नंचनोबहुभवेत् । अतिथींश्चलभेमहि ॥ याचितारश्चनःसंतुमाचयाचिष्मकंचन ॥ दातारोवोभिवर्ध
तांवेदाःसंततिरेववः ॥ श्रद्धाचवोमाव्यगमद्बहुधेयंचवोस्तु ॥ अन्नंचवोबहुभवेत् । अतिथींश्चलभध्वं ॥ याचितारःश्चवःसंतुमाचयाचिढ्वकंच
न ॥ शेषमन्नंकिंक्रियतां–इष्टैःसहभुज्यतां ॥ स्वादुषंसदःपितरोवयोधाःकृच्छ्रेश्रितःशक्तीवंतोगभीराः ॥ चित्रसेनाइषुबलाअमृध्राः
सतोवीराउरवोव्रातसाहाः ॥ ब्राह्मणासःपितरःसोम्यासःशिवेनोद्यावापृथिवीअनेहसा ॥ पूषानःपातुदुरितादृतावृधोरक्षामाकिर्नोअघशंसईशत ॥ इहैवस्तंमावियौष्टंविश्वमायुर्व्यश्नुतं ॥ क्रीडंतौपुत्रैर्नप्तृभिर्मोदमानौस्वेगृहे ॥ आयुःप्रजांधनंविद्यांपुत्रंपौत्रंसुखानिच ॥ प्रयच्छंतुतथा
राज्यंपितरःश्राद्धतर्पिताः ॥ सत्याःएताःआशिषःसंतु ॥ गोत्रंगोत्राभिवृद्धिरस्तु ॥ वंशाभिवृद्धिरस्तु ॥ पितृणांब्रह्मलोकावाप्तिरस्तु ॥
अद्यमेसफलंजन्मभवत्पादाब्जवंदनात् ॥ अद्यमेवंशजाःसर्वेयातावोनुग्रहादिकं ॥ पत्रशाकादिदानेनक्लेशितायूयमीदृशाः ॥ तत्क्लेशजातंचि
त्तस्थंविस्मृत्यक्षंतुमर्हथ–विस्मृत्यक्षमामहे ॥ अद्यतिथिसूर्यपर्वणि ॥ आसनभोजनशाकपाकद्रव्यदाक्षिणासर्वब्राह्मणवचनात्परिपूर्णतास्तु ॥
मंत्रहीनंक्रियाहीनंभक्तिहीनंद्विजोत्तमः ॥ श्राद्धंभवतुसंपूर्णप्रसादाद्भवतांमम ॥ आसीमांतमनुव्रजेत्–अनुव्रजामः ॥ कयानश्चित्रआभुव
दूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥ वामदेवायनमोज्येष्ठाय०नमः ॥ अग्नावग्निश्चरति प्रविष्टः ऋषीणां पुत्रो अभिशस्तिपावा ॥ स नः स्योनः सुयजा यजेह देवेभ्यो हव्यं सदमप्रयुच्छन्त्स्वाहा ॥ अष्टावेतावन्येषु धिष्णियेषु ...त्यष्टाशफाःपशवःपशूनेवावरुंधेषण्मां
जालीयषड्वाऋतवऋतवःखलुवैदेवाःपितरऋतूनेवदेवान्पितॄन्प्रीणाति ॥ यस्यस्मृ०च्युतंअनेनममपितुःप्रतिसांवत्सरिकश्राद्धअग्नौकरणब्राह्मणभो
जनपिंडप्रदानकमंत्रयात्मकेनभगवान्पितरःस्वरूपीजनार्दनवासुदेवहरिहरःप्रीयतांनमम ॥ विष्णवेनमो ३ ॥ वषट्तेविष्णवासआकृणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मितन्मेंजुषस्वशिपिविष्टहव्यं ॥ वद्धैंतुत्वासुष्टुतयोगिरोमेयूयंपांतस्वस्तिभिःसदानः ॥ आशीर्वचनं ॥ अपंहैतींद्रांयत्रत्रिपुरो
डाशमेकांदशकपालंनिर्वपेद्धद्धोवापरियंतोवेंद्रमेवत्रातारःस्वेनंभागधेयेनोपधावतिसएवैनंत्रायतइंद्रायार्कोश्वमेधवंतेपुरोडाशमेकादशकपालंनिर्वपेद्यन्म
हायज्ञोनोपनमेदेतेवैमहायज्ञस्यांत्यैतनूयदर्कोश्वमेधाविंद्रसेवार्कोश्वमेधवंतःस्वेनंभागधेयेनोपधावतिसएवास्मांअंतितोमहायज्ञंचावयत्युपैनंमहायज्ञोनम
ति ॥ एषपितृयज्ञः ॥ यजमानस्यपितृणांब्रह्मलोकावाप्तिरस्तु ॥ ॐबृहत्सामक्षत्रभृद्वृद्धवृष्णियंत्रिष्टुभौजःशुभितमुग्रवीरं ॥ इंद्रस्तोमेनपं
चदशेनमध्यमिदंवातेनसगरेणरक्ष ॥ इतिमंत्रेणभस्मधारणं ॥ ॐयातेअग्नेयज्ञियातनूस्तयेह्यारोहात्मात्मानमच्छावसूनिकृण्वन्नस्मेनर्यापुरूणि ॥
यज्ञोभूत्वायज्ञमासीदस्वांयोनिंजातवेदोभुवआजायमानःसक्षयएहि ॥ इतिमंत्रेणआत्मसमारोपणंकार्यं ॥ येभूताःप्र०श्वचांडाल० ॥ आचम्य ॥
शांतापृ० ॥ अद्य०पुण्यतिथौममपितुःप्रतिसांवत्सरिकश्राद्धांगपरिहाणि(अपकर्ष)सद्यस्तिलतर्पणंकरिष्ये ॥ अप०पिता०प्र०तर्पणंकुर्या
त ॥ अनेनतिलतर्पणाख्येनकर्मणाभग०प्री० ॥ इतितैत्तिरीयशाखांतर्गतआपस्तंबशाखोक्तश्राद्धसंकल्पप्रयोगः ॥
॥ अथविधुरएवपृष्टोदिविविधानंकार्यं । आचम्यप्राणाना० । ममपितुःप्रतिसां०विधुरकल्पोक्तअग्नौकरणार्थंपृष्टोदिविविधानेनअग्निसिद्धिं
क० ॥ यत्राग्निस्थाप्यततिस्थंडिलंकृत्वा ॥ ॐअन्वग्निरुषसामग्रमख्यदन्वहानिप्रथमोजातवेदाः ॥ अनुसूर्यस्यपुरुत्राचरश्मीननुद्यावापृथिवीआ
ततान ॥ ॐपृष्टोदिविपृष्टोअग्निःपृथिव्यांपृष्टोविश्वाओषधीराविवेश ॥ वैश्वानरःसहसापृष्टोअग्निःसनोदिवासरिषःपातुनक्तं ॥ इतिमंत्रेणा
ग्निंप्रतिष्ठाप्याग्निमिध्वा ॥ ॐभूर्भुवस्सुवःइतिपरिषिच्य ॥ अलंकृत्य ॥ अदितेनुमन्यस्वेतिवरदोभव ॥ चतस्रसमिधमादायाभिघार्य ॥
गायत्रीमंत्रेणैकसमिधंहुत्वा। सावित्रेदं । ॐतत्सवितुर्वरेण्यस्यचित्रामाहंवृणेसुमतिंविश्वजन्यां । यामस्यकण्वोअदुहत्प्रपीनांसहस्रधारांपयसा

महींगांस्वाहा ॥ सवित्रेइदं० ॥ ॐअद्यानोदेवसावितःप्रजावत्सावीःसौभगं ॥ परादुःष्वप्न्यंसुवस्वाहा ॥ सवित्रे० ॥ विश्वानिदेवसवितर्दु
रितानिपरासुव ॥ यद्भद्रंतन्नआसुवस्वाहा ॥ सवि० ॥ अदितेन्वमं०इतिपरिषिच्य ॥ अग्निंसंपूज्य ॥ अग्नेत्वन्नो० ॥ अनेनपृष्टोदिविविधा
नेनभगवान्परमेश्वरःप्रीयतांनमम ॥ इतितैत्तिरीयशाखोक्तंपृष्टोदिविविधानंविशेषिकप्रयोगः ॥ अथसंक्षिप्तदर्शश्राद्धप्रयोगः ॥ वैश्वदेवं
कु० ॥ आचम्यपवित्रपाणिःप्राणानायम्य ॥ विष्णुर्वि० ॥ प्राचीनावीती । पितृपितामहप्रपितामहानांअमुकगोत्राणांअमुकशर्मणांसपत्नीकानां
वसुरुद्रादित्यस्वरूपाणांमातामहमातुःपितामहमातुःप्रपितामहानांअ०गो०अ०श०सपत्नीकानांव० ॥ दर्शश्राद्धब्रह्मार्पणनेविधिनाकरिष्ये ॥ वर्तु
लमंडलंकृत्वा ॥ अयंगंधाःअयंतिलंकुशाः ॥ पितरादिमातामहांताःपितराःआगतंसुस्वागतं ॥ ब्राम्हणस्यपादयोःअत्रंनममगंधंनममतिलाक्षतपुष्पं
हस्तेतुलसीदलानि ॥ पितृपितामहप्रपितामहभूर्भुवःस्वधाइदंवःपाद्यं[१]मातामह०इदंवःपाद्यं[२]सुपाद्यं ॥ शन्नोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोर
भिस्रवंतुनः ॥ शुक्रमसिज्योतिरसितेजोसिदेवोवःसवितोत्पुनात्वच्छिद्रेणपवित्रेणवसोसूर्यस्यरश्मिभिः ॥ सव्यं ॥ चरणंप०रेम ॥ नमोब्रम्ह०नमः ॥
हस्तौपादौप्रक्षाल्य ॥ आचम्यब्राम्हणैसह ॥ प्राणायामः । दर्शश्राद्धांगब्राम्हणपूजनंकरिष्ये । अर्घ्यस्थानेसंकल्पः । अस्तुसंकल्पसिद्धिः ॥ अप०
।' गंधाः-सुगंधाःइमानिपुष्पाणितुलसीदलसहितानिसुपुष्पाणि ॥ धूपवोधूपः—सुधूपः ॥ एषतेदीपः—सुदीपः । अनुलेपनार्थेगोपीचंदनं—सुचंदनं
॥ धारणार्थंयज्ञोपवीतं—सूपवीतं ॥ फलार्थेपूगफलं—सुफलं ॥ आच्छादनार्थेकिंचि[illegible]रण्यं—आस्त्वाच्छादनं ॥ पवित्रार्थे इमेकुशाः—अस्तुपवित्रं ॥
सर्वाभावेतिलाः ॥ इदंपितृभ्योनमोअस्त्वद्ययेपूर्वासोयउपरासईयुः ॥ येपार्थिवेरजस्यानिषत्तायेवानूनं[illegible]सुवृजनासुविक्षु ॥ एतानिअत्र

१ मातृपितामहिप्र.अ.गो.अ.श.व० ॥ २ मातामहीमातुःपि.अ.गो.अ.श०व० । दर्शपार्वणं । अयंप्रचारः । विश्वप्रकाशादिग्रंथेसपत्नीकानां । इत्युक्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गंधपुष्पधूपदीपआच्छादनांताःपंचोपचाराःसर्वेसंपूर्णाभवंतु ॥ अर्चनविधिस्त्वर्चितमस्तु ॥ सव्यंविष्णोःस्मरणपूर्वकंमंडलादिपात्रासादनंकु०
–कुरुष्व ॥ (देवस्थानेचतुरस्रमंडलंकृत्वा) ॥ पितृस्थानेवर्तुलमंडलंकृत्वा ॥ अभिघार्य ॥पृथिवीतेपात्रंद्यौरपिधानं...दिवोअग्निःपृथिव्यावैश्वानरमृताय
जातमग्निं ॥ कविंसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः ॥ आमासुपक्वमैरयआसूर्यंरोहयोदिवि ॥ घर्मंन्नसामंतपतासुवृक्ति
भिर्जुष्टंगिर्वणसेगिरः ॥ सोमोधेनुंसोमोअर्वंतमाशुंसोमोवीरंकर्मण्यंददातु ॥ सादन्यंविदथ्यंसभेयंपितुश्रवणंयोददाशदस्मै ॥ गायत्री
मंत्रेणपात्रस्थमन्नंप्रोक्ष्य ॥ अपसव्यं ॥ सत्यंत्वर्तेनपरिषिंचामि ॥ पृथ्वीतेपात्रंद्यौरपिधानंब्राह्मणस्त्वामुखेअमृतेमृतंजुहोमिस्वधाब्राह्मणा
नांत्वाविद्यावतांप्राणापानयोर्जुहोम्यक्षितमसिमैषांक्षेष्ठाअमुत्रामुष्मिलोके ॥ इदंविष्णुर्वि०सुरे ॥ स्वधाश्रीविष्णोःकव्यंरक्षस्व ॥ अस्मत्पि
तरोदेवताःएतद्वःकव्यंसपरिकरंदत्तंचदास्यमानंचआतृप्तेःस्तृतिपर्यंतंगयइयंभूमिःगयागदाधरोभोक्ताभोक्ताचब्रह्माब्रह्मरुपमन्नंकल्पितरजतपात्रस्थि
तमन्नंअक्षय्यवटछायेयं ॥ पितृ०मातामह०महेभ्यःगोत्रेभ्यःशर्मभ्यःइदमिदमन्नंअमृतरुपेणसंपद्यंतांस्वधाकव्यंनमम ॥ गयायांदत्तमस्तु ॥
गयागदाधरप्रीतोभवतु ॥ येचेहपितरोयचेनेहयांश्चविद्मयांउंचनप्रविद्म ॥ अग्नेतान्वेत्थयदितेजातवेदस्तयाप्रत्तंस्वधयामदंतुस्वधानमः ॥
यथासांकल्पितमन्नंप्रीयतां ॥ सव्यं ॥ ब्रह्मार्पणंब्रह्महविः०समोविष्णुःप्रसीदतु ॥ उपवीती ॥ ईशानविष्णुःकमलासनकार्तिकेयोवन्हित्रया
र्करजनीशगणेश्वराणां ॥ क्रौंचामरेंद्रकलशोद्भवकश्यपानांसभ्यावसथ्यदधिक्रणवमतंगवानां ॥ संध्यात्रयाम्रवटफल्गुगदाधराणांपादानमामि
सततंपितृमुक्तिहेतोः ॥ गयायैनमः ॥ गदाधराय० ॥ पुंडकाक्षाय० ॥ काशीविश्वेश्वराय० ॥ गयेयंगयेयं ॥ देवतानैवेद्यं ॥ अपसव्यं ॥
एकोविष्णु०भुगव्ययः ॥ अनेनममपितुःदर्शश्राद्धीयब्राह्मणभोजनेनतेनश्रीपितरःस्वरुपीश्रीमज्जनार्दनवासुदेवःप्रीयतां ॥ दशगायत्रींन्जपेत् ॥

अपेक्षितंयाचितव्यंत्याज्यंचैवानुपेक्षितं ॥ उपविश्यसुखेनैवभोक्तव्यंस्वस्थमानसैः ॥ विद्यमानशाकपाकादिपदार्थेषुयद्राचेतेतग्राह्यंयन्नरोचतेत
त्याज्यंयथासुखंजुषध्वं–जुषामहे ॥ दक्षिणांदत्वा ॥ यस्यस्मृत्या०अनेनदर्शश्राद्धांगपार्वणब्राह्मणभोजनाख्येनकर्मणाभगवान्परमेश्वरः
प्रीयतांनमम ॥ विष्णवेनमः ॥ इतिदर्शश्राद्धपार्वणविधिः ॥ अक्षय्यतृतीया ॥ अद्य०पुण्यतिथौयुगादिश्राद्धंपार्वणविधिनाकरिष्ये ॥
दर्शश्राद्धवत्कुर्यात् ॥ उदकुंभदानं ॥ अद्य०ममपितृणांअक्षय्यतृप्त्यर्थंब्राह्मणायउदकुंभदानंकु० ॥ उदकुंभपूजांकुयात्पंचोपचारैःसंपूज्य ॥
ब्राह्मणपूजांकृत्वा ॥ एषधर्मघटोदत्तोब्रह्माविष्णुशिवात्मकः ॥ अस्यप्रदानातृप्यंतुपितरोपिपितामहाः ॥ इदंउदकुंभदानंअमुकशर्मणे
ब्राह्मणायतुभ्यमहंसंप्रददे ॥ इतिअक्षय्यतृतीयायुगादिश्राद्धस० ॥ ॥ संक्रांति ॥ अद्य०पुण्यतिथौअयनश्राद्धपार्वणेनविधिनाकरिष्ये ॥
दर्शश्राद्धवत् ॥ तिलगुडदानं ॥ ममपितन्नदिश्यब्राह्मणायातिलगुडदानंकु० ॥ तिलस्नाईतिलोद्वर्तीतिलेहोमंतिलोदकी ॥ तिलभुक्ति
ल्दाताचाषदतिलाःपापनाशन ॥ इदंतिलगुडदानंसदक्षिणाकंअमुकश०ब्राह्म०संप्रददे ॥ इतिसंक्रांतप्रयुक्तश्राद्धविधिः ॥

प्रायश्चित्तःश्राद्धभोजने—दशकृत्वःपिबेदापोगायत्र्याश्राद्धभुग्द्विजः ॥ ततःसंध्यामुपासीतजपेच्चजुहुयादपी ॥ उच्चार—आवाहनार्घ्यसंकल्पपिंडे
दानान्नदानयोः ॥ पिंडाभ्यंजनकालेतुतथैवांजनकर्मणि ॥ अक्षय्यासनपाद्येषुगोत्रनामप्रकाशयेत् ॥ ...सपिंडीकरणादूर्ध्वंयावदद्वत्रयंभवेत् ॥
तावदेवनभोक्तव्यंतदीनेश्राद्धमात्रके ॥ प्रथमाद्विस्थ्यादिभोजीद्वितीयेमांसभक्षकः ॥ तर्तीयेरक्तभोजीस्याच्छुद्धंश्राद्धंचतुर्थके ॥–धर्मसिंधु ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

। इत्यापस्तंबोक्तश्राद्धसंकल्पसमाप्तः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.07.19 15:56
,TRANSFERRED=2019/07/24 at 16:02:27
,PAGES=20
,TYPE=STD
,NAME=S0001116
,Book Name=M-2018-AAPSTAMBSHARADHSANKAL
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection